CB/
Asian
Sans
CABIN
BRANCH

PK 669
.Y37
1822
Copy 1

YATES'S

# SUNSCRIT READER;

OR

## EASY INTRODUCTION

TO THE

## *Reading of the Sunscrit Language.*

संस्कृतपाठोपकारकोयं ग्रन्थः ।

500 *copies.* DEE-NAGREE CHARACTER. *April* 1822.

LIBRARY OF CONGRESS

THE

# SUNSCRIT READER;

OR

## EASY INTRODUCTION

TO THE

## *Reading of the Sunscrit Language.*

IN FIVE PARTS:

I. SELECT SENTENCES.
II. DIALOGUES.
III. DUTIES OF YOUNG PERSONS.
IV. FABLES.
V. POETICAL EXTRACTS.

BY

W. YATES.

संस्कृतपाठोपकारकोयं ग्रन्थः.

तत्र विशेषाः,

| | |
|---|---|
| प्रथमभागः, | वाक्यमाला. |
| द्वितीयभागः, | कथोपकथनं. |
| तृतीयभागः, | बालकानां कर्त्तव्यकर्म्मनिरूपणं. |
| चतुर्थभागः, | नीति विषये दृष्टान्तकथा. |
| पञ्चमभागः, | संगृहीतश्लोकाः. |

स्कुलबुक सोसाइटि नामक समाजानुकूल्येन त्रिवेद-
सप्तैकप्रमितशाके कलिकातायामिश्यन् मुद्रायन्त्रे मुद्रितोऽभूत्.

*CALCUTTA:*

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR-ROAD,
FOR THE CALCUTTA SCHOOL-BOOK SOCIETY.

1822.

PK669
.Y37
1822
copy 1
ASIAN
SANS

# संस्कृतपाठोपकारकः।

## प्रथमभागः
## वाक्यमाला।

### प्रथमाध्यायः।

गच्छामि। बोधसि। धावति। पिबावः। रक्षथः। चुम्बतः। पचामः। राजथ। पश्यन्ति।

आर्चीत्। आर्द्दीः। अगूहिषं। अचेष्टां। अचिच्छदतं। अतापस्व। अद्विषुः। अनैष्ट। अबोधिष्म।

भक्ष्यति। पक्ष्यसि। प्रेष्यामि। यक्ष्यतः। याचिष्यथः। राजिष्यावः। लषिष्यन्ति। सेविष्यथ। हरिष्यामः।

अहं खादामि। त्वं भुंक्ष्व। स पिबति। आवां क्रीडावः। युवां पठतं। तौ जाग्रतः। वयं गायामः। यूयं नृत्यत। ते लिखन्ति। ते प्रणमन्ति। वयमागमिष्यामः। यूयमायास्यथ।

त्वं लोभसे। अहं क्षमे। स कामयते। वयं कम्पामहे। यूयमवगाहध्वं। ते तरन्ते। ते ध्वंसन्ते। यूय मारभध्वे। वयं चेष्टामहे।

मया ज्ञायते। त्वया पठ्यतां। तेन रच्यते। आवाभ्यां श्रूयते। युवाभ्यां गम्यते। ताभ्यां कथ्यते। अस्माभि र्लभ्यते। युष्माभि र्नीयते। तैः क्रियते।

अहं बोधयामि। त्वं विनाशयसि। स भोजयति। अहं पिपित्सामि। त्वं जिगमिषसि। स बुभुक्षति।

---

द्वितीयाध्यायः।

पापो धर्म्मं जयति। बुध ईश्वरमाश्रयति। राजा धर्म्मेण श्रयति। डयते पक्षी। ध्रुवो ध्रुवति। पुत्रं प्रसूते नारी। मेघो भूमिं सिञ्चति। भिक्षुरुदरं भरति। मुनिस्तीर्थं सरति। साधुः पापं त्यजति। वायुर्गन्धं हरति। वत्सो दुग्धं धयति। तिलै र्धान्यं विनिमयते। तन्तुवायो वस्त्रं वयति। पिता पुत्रं ह्वयति। पुत्रः पितरमाह्वयति। गानं गायति गायकः। देहं जलेन प्रक्षालयति। साधुः खलं ध्यायति। रात्रौ जनो निद्राति। वृक्षो हिमेन पायति। पुष्पं वातेन म्लायति। दुग्धं श्रायति। नरः शङ्खं धमति। लोहकारो धमत्यग्निं। शिष्यु र्वेदं मनति। मुनि र्विरले तिष्ठति। त्वं गन्तुमर्हसि। धान्यं मुञ्चति स्त्री। नृपादेजति चौरः। साधुः पापात् विपच्छति। पिता पुत्रं स्वजते। भास्करो भासते तीव्रं। पद्मं सङ्कोचति चन्द्रात्। बालः क्रीडति बालैः। पापं क्षमते। स्वगुणं घोषति। प्रलये चेतिष्यति।

सुखार्थं चेष्टते। हविश्चोततित वह्नौ। राजा जयति। निद्रालु र्जृम्भति। अग्नि र्ज्वलति काष्ठेन। ईश्वरस्य वचसा जीवामि। गृहं त्यजति विरागी। वह्नि र्दहति काननं। अश्वो धावति। दन्तान् धावति काष्ठेन। शास्त्रं पठति बालकः। शास्त्रं बोधति सुधीः। भिक्षु-रन्नं भिक्षति। मुनि र्भ्रमति तीर्थं। नेत्रे निमीलति। देवं यजति। सुखाय यतते लोकः। वराहो भुवं दरति। खगो रंहति। वने रमते। मित्रं द्रष्टुं लसति। भूमौ लोठति बालकः। स तिष्ठति गृहे। भ्रातरं वन्दते। रिपुं सर्द्धते। कुसुमं स्फोटते।

धान्यं दात्रेण दाति। कृषको भूमिं माति। गृहं याति। धनं राति। शाकं श्राति। गङ्गायां स्नाति। आत्मानं नौति। जलं निःसरति। दासो बिभेति प्रभोः। विवेकी देहात्मानं विवेक्ति। ईश्वरो विश्वं वेवेष्टि। वीजादङ्कुरो जायते। पीयते पयः। साधुं प्रीयते। पुत्रं सूयते। परदुःखेन दयालु र्दूयते। शाति लोको दुर्भिक्षेण। भुक्तमन्नं क्षीयति। क्रोधी शा-म्यति। पथिको विश्राम्यति। लुब्धो भ्राम्यति। पुत्रापराधं पिता क्षम्यति। वीरो वाणं क्षिप्यति। न शक्यते तथा कर्त्तुं। मुनि र्ज्ञानेन सिध्यति। दुष्टसङ्गेन दुष्यति। आतपात् सुष्यति सरः। भक्तेण तुष्यति शिशुः। गुरुः शिष्यं शिक्षते। धनाय यतते जनः। गात्रं ज्वरः

क्षुभ्यति। कान्तः कामिनीं कुप्यति। सर्पः कञ्चुकं मुञ्चति। स्वर्णकारः स्वर्णं मस्यति। मुष्यति कुठारेण द्रुमं। भूमौ लुठ्यति बालकः। बन्धु र्मित्राय कुप्यति। रोगो देहं क्षप्यति। वन्ध्या लुभ्यति पुत्त्रं। तरुः फलेन पूर्य्यति। वृद्धो जीर्य्यति। पापी खिद्यते। पतिं रुध्यते दुष्टा। श्रम्यते कष्टेन। योगी गुहायां युज्यते। सृज्यते विश्वं परमेश्वरः। वस्त्रं रज्यते रजकः। वाससा देहं स्तृणोति। धनं चिनोति। वातः शाखिनं धुनोति। चेतः कामेन दुनोति। पूणोत्यतिथीन् साधुः। परमेश्वरो भुवनमाप्नोति। सभायां धृष्णोति। मां दभ्नोति खलः।

हस्तं धुवति नटः। नरा म्रियन्ते पापेन। ध्रियते दुर्जनः। बालुकां गिलति वालिशः। त्वां प्रति दासं नुदिष्यति। को विश्वं सृजति। स पृणाति। अतलस्पर्शे घूर्णति। तैलेन गात्रं संस्पृशति। घोटको घुटति। बन्धनं तुडति हस्ती। विमुञ्चति प्राणान्। पुण्यं विन्दति। वृक्षं सिञ्चति। शिष्यो गुरुं ग्रन्थं पृच्छति। जले मज्जन्ति धीवराः। वस्त्रं सूत्रेण जुडति। दधिभाण्डं भिनत्ति। ज्ञानी छिनत्ति कर्म्मबन्धनं। वित्तं विनक्ति। तण्डुलान् क्षुणत्ति। नरं गुणे विंश्लिनष्टि। यवान् पिनष्टि। दन्ती पादपं भनक्ति। भोगं भुनक्ति। अन्नं भुंक्ते। विद्यां विनक्ति छात्त्रः। सम्पृणक्ति न केनापि। वह्निमिन्धे। तन्तुवाय स्तन्तुं तनोति। गां सनोति ब्राह्मणाय। मां

Sanskrit Reader



पुनातु। मेघो गगणं वृणाति। जृणाति जरया वृद्धः। कुपुत्रं शृणाति माता। लिनाति पत्नीं कान्तः। भ्रिणाति कान्तां पतिः। वीरो रणं व्रिणाति। मातरं प्रीणाति। त्वमिदं गृहाण। मालां ग्रथ्नाति मालिकः। मुमुक्षुः श्रथ्नाति। गजो नलिनीं मृद्नाति। भिक्षुरन्नमिष्णाति। तं यन्त्रेण यन्त्रयति। घटं पयसा पारयति। ताम्रं ताडयति। सुवर्णं तोलयति। शोकाकुलं सान्त्वयति। नरः स्रष्टारं पूजयति। खड्गं तेजयति कर्म्मकारः। धनं वण्टयति भ्राता। मन्त्रिभिर्मन्त्रयति राजा। दुःखं वेदयति दरिद्रः। नीतिं घोषयति। वेदार्थं भावयति। सर्पो भेकं ग्रासयति। सेनानीः कवचं पोषयति। काव्यं कथयति कविः। ग्रहणं गणयति गणकः। गौ र्यवसाय स्पृहयति। पयसा बालं सामयति। कालं वेलयति व्यजनेन वातयति। धूपो गृहं वासयति। घृतेनान्नं मिश्रयति। पटं चित्रयति। चौरं दण्डयति। द्रविणं व्यययति। नृपं वर्णयति। वस्त्रं वर्णयति। राजसूयं पारयति।

---

## तृतीयाध्यायः।

तत्श्रुत्वा स कर्णौ स्पृशति। अवधीरितसुहृद्वाक्यस्य फलमेतत्। कस्मातु समर्थो मित्रादन्यः। छिन्धि तावन्मम बन्धनं। सत्वरं त्रायस्व मां। न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः। नहि सुखं दुःखै र्विना लभ्यते। वृद्धो गृहे ग्लायति। विद्वानेवहि जानाति

विद्वज्जनपरिश्रमं। नहि बन्ध्या विजानाति गुर्व्वीं प्रसववेदनां। अथावदत् सोऽपि विपन्नरोषः। काले बालतृणानि खादसि। न वा प्रत्याशया धावसि। उद्योगिनं पुरुषमेति सम्पद्।

कस्त्वमिदानीं कुत्र गच्छसि। भ्रमितुं वहिर्गच्छामि। तवावासः कुत्र। किं कर्म्म कर्त्तुं शक्नोषि। प्रस्तुतं जलं वर्त्तते मुखं प्रक्षालय। भक्ष्यं किं कृतमस्ति। त्वया किं भोक्तव्यं। मम काचित् व्यथास्ति भोक्तुं न शक्यते। मयैतद्देशीय भाषा बोद्धुं न शक्यते। किं कर्त्तव्यं। को मां शिक्षयितुमर्हति। केनाहमुत्तमैकपण्डितं प्राप्स्यामि। कस्तव परामर्शः। कथयामि शृणु। एव उपायो भवितुमर्हति। एतादृक् दुःखं कस्मिन् काले नाभूत्। कापि चिन्ता नास्ति सर्व्वं सेत्स्यति। अस्माभिरपराधे कृते परमेश्वरनामग्रहणमनुचितं। त्वं कस्मादागच्छसि। कुत्र प्रयासि त्वं। मया सार्द्धं द्वे त्रीणि दिनानि वा स्थातुं शक्नोषि। सम्प्रत्यहं काशीं प्रयामि विलम्बेनालं। भवनस्य मङ्गलं वद। भवनस्य कुशलं सर्व्वे हि प्राणेषु कुशलिनः सन्ति। भद्रं तदेव सर्व्वमादरं। तत् समस्तं मङ्गलं। तत्र चिन्ता नास्ति। त्वं कलिकाताख्यनगरे यास्यसि। यास्यामि मम कतिचिद्दिनानि विलम्बो भविष्यति। सम्प्रति किमपि कार्य्यमस्ति। तत् कार्य्यानन्तरं द्वि त्रि दिनाभ्यन्तरे यास्यामि। अहमपि यास्यामि मम कतिचिद्दिनानि विलम्बोऽस्ति। आवां मि-

लित्वा यास्यावः। यदा यास्यसि तदा मामवश्यं कथयिष्यसि। मद्गमनात् पूर्व्वं त्वां कथयिष्यामि मिलित्वा वां गमिष्यावः। नौकया पदव्रजेन वा यास्यसि। नौकया गमने मम सङ्गति नास्ति। केन प्रकारेण यास्यसि। पदव्रजेन यास्यामि। यहि गच्छामि। अन्यत् किं कार्य्यं इदानीमधिका वेला नाभूत्। त्वं पश्याकाशे सूर्य्यं चक्षुरुन्मील्य कति वेला अभवन्। यद्भविष्यति तद्भूतं। शीघ्रं गच्छामि हट्टो लग्नोऽभूत्।

---

## चतुर्थाध्यायः।

तस्य वहु ज्ञातयः कुटुम्बाः सन्ति। भद्राणि सर्व्वकर्म्माणि प्रशंसार्हाणि भवन्ति। अनेन च मम को लाभो भविष्यति। अस्मिन्विषये कस्तव परामर्शः। अस्य वचसः किं समुत्तरं भवता दातुमर्हते। मदुपकारं कोऽपि किं कर्त्तुं न शक्नोति। भवता ये लोका दृष्टास्ते रमणीयवस्त्रावृताः। एते वालका विद्यामभ्यस्तुं मनोनिवेशयन्ति। किमस्य पशो नाम भवान् वेत्ति। अस्य तु कार्पण्यस्यावधि नास्ति। तव पाठशालायामहरहः कति वालका आगच्छन्ति। केनेदं पुस्तकं विरचितं। त्वमेता रजतमुद्राः पेटके स्थापयित्वा स्वगृहं गच्छ। तेनौषधेन भवतः किमुपकारो दर्शितः। परमेश्वरस्यानुग्रहेणाहं सुस्थोऽभवं। वृक्षस्य पुष्पे सम्पन्ने फलाशा भवति। अस्मिन् ग्रन्थे वह्वी भ्रान्ति र्विद्यते। उत्कोच-स्वादानं दानमपि गर्हितं। अस्य तु सर्व्वो हि भारो

ममोपरि। तस्मिन् काचिच्चिन्ता नास्ति। इयतावधारणेन किं प्रयोजनं। कापि भीति र्नास्ति। आसनं गृहीत्वोपविश्यायव्ययपत्रं लिख। महान् मेघो ऽभवत्। महती वृष्टि र्भविष्यतीत्यनुमीयते। तेषां कथायां नह्रि मद्विश्वासो जायते यस्मादनेकधा ते मिथ्यां कथयन्ति। परमेश्वरो दयालुस्तेनैव मम दुःखसान्त्वना जाता। अस्माकमहङ्कारो माभूत् किन्तु सत्परामर्शं श्टणुमः। तस्य तु कोऽपराधो जातो येनैयती शास्तिर्लब्धा। त्वं किमर्थं बिभेषि परमेश्वरो ऽस्मान् रक्षितुं शक्नोति। अमी केवलं वञ्चयित्वा कालं गमयन्ति ते भीतिः करणीया। अनयोः को भेदः केनाहं तं ज्ञातु शक्नोमि। अस्मिन्नितरप्रतिबन्धिर्नास्ति किन्तु परिश्रमचित्तनिवेशाभ्यामेव सिध्यति।

न प्रभोरधिकोभृत्यः। न गुरोरधिकः शिष्यः। युवयोः कोविवादो जातः। किमहं तं दूरीकर्त्तुं शक्नोमि। यदि पुरैवेदमकथयिष्यसि तदा कर्त्तव्यं किमित्यविज्ञापयिष्ये। यदपि परमेश्वरं प्रति कर्त्तव्यं यच्च मनुष्यान् प्रति कर्त्तव्यमस्ति तदुच्यतां। मया तस्मै दत्तमौषधं किन्तु प्रतीकारः कोऽपि नाभूत्। अस्ति चास्माकमाशा यद्भवान् बन्धु र्भविष्यति। तेषु काराग्टहात् पलायितेषु सर्व्वेषां दुःखं भवति। ते वंऊधा छलोक्ति विहिता किन्त्वहं तस्मिन्नविश्वस्तवान्। अस्मिन् देशे शस्य जननाभावात् सर्व्वै रनुमीयते यदत्र दुर्भिक्षं भविष्यति। तस्मालये ऽद्य वहवो लोका भक्षयिष्यन्ति किं तत्र भवान् निमन्त्रितः। विपदि पतितोऽहं किं करोमि ममात्मीयः कोऽपि

नास्ति। तस्य निन्दिताचारेण तत् पितु र्दुःखमभवत्। ये चेश्वरस्याज्ञां पालयन्ति ते परत्रानन्तं सुखं भोक्ष्यन्ति। ममातिप्रीति र्भवति यदि सहवासो भवता विधीयते। सहि विदेशं गतवान् किमहं जाने तदीय दर्शनं प्राप्स्यामि न वा। यदेते ऽत्यन्तालस्य वशेन कालं यापयन्ति तस्मादेव मूढतया मरिष्यन्ते। महतः क्षुद्रानपि जनान् प्रति समादरणमस्माकमुचितं। तस्य यमुपकारमहं कृतवान् तत् किञ्चिदपि तेन न स्मर्य्यते। इन्द्रियानामनिग्रहेण कायमनसी नश्यतः। सहि कृतनिजदोष वशेन किमप्याख्यातुं न शक्नोति। यद्यपि ज्ञानहीनो भवति तदा तस्य धनेन किं। अस्माकं परमायुरत्यल्पमतो ऽद्यैव परकालार्थं चिन्तनीयं। यदि वयं बन्धुभ्यः प्रेमाणं न कुर्य्याम स्तदा कस्मै करिष्यामः। मम भद्रा मेधा नास्ति यतो ऽहमभ्यस्य विस्मरामि। ते हि सततमेव गर्हितं कुर्व्वन्ति अतो दुःखेन यापयन्ति कालं। ते हि निजदोषेण महाविपदि पतिताः। परेद्यु र्मम पुत्रस्य विवाहो भविष्यति अतोऽत्र समागत्य भवानभिनन्दयतु मां। किमहमपराधं कृतवान् यन्मां विनिन्दसि। हे महाशय मयि क्षम्यतां नाहं भवते दुःखं दातुमिच्छामि। मया ज्ञातं यदस्मिन् विषये मम भ्रान्ति र्जाता। इदानीं किं कर्त्तव्यं। सहि समागत्य सर्व्वैः सह कलहं करोति अतस्तदागमनं वारय। दीनेभ्यः करुणा महद्भिः करणीया। वारं वारमीश्वरस्याराधनां साधवः कुर्व्वन्ति। सहि रोगेणात्यन्तरुग्नस्तस्य सुस्थतायां

लक्षणं नास्ति। विवेचनाशक्ति र्मनुष्याणामेव न पशूनां। इदानीं खेदः समुचित एव परत्र खेदेनालं। यथार्थरूपेण व्ययविधुरचेतसां धनेन किं प्रयोजनं। बलिप्रदानादीश्वरस्याज्ञानुपालनं वरं। त्वया सभायां निर्जने वा स्थित्वा सुखमनुभूयते। ये हि प्रेम पूर्व्वकं परमेश्वरस्याज्ञां पालयन्ति केवलं तएव परित्राणभागिनः स्युः। सर्व्वेषां मङ्गल चेष्टास्माकमुचिता। कारणमन्तरेण कस्यचिदसन्तुष्टि र्न कर्त्तव्या। भवन्तः सावधाना भवन्तु तेषामिव निन्दिताचारं मा कुर्व्वन्तु। ये हि परमेश्वरं न मन्यन्ते तेषां कीदृशी दुर्द्दशा भविष्यति। हा वयं कीदृक् पापं कृतवन्तः। क्षणध्वंसिनो मनुजा अनाद्यनन्तस्य परमेश्वरस्य कथं तत्वं जानन्ति। यस्वात्मानं क्षुद्रतरं मन्यते सहि महान् भविष्यति। किन्तु यो महान्तं कृत्वात्मानं मन्यते स क्षुद्रतरो भविष्यति। परमेश्वरो नित्यः सर्व्वशक्तिमान् सर्व्वज्ञः वयमनित्या दुर्व्वला अज्ञानाश्च अतस्तस्मादयं विभिन्नाः।

Property of the
Library of Congress

# द्वितीयभागः।

## कथोपकथनं।

### प्रथमाध्यायः।

विद्यार्थि पण्डितयोरिष्टालापः।

हे महाशय तव मङ्गलमास्तां। को भवान्। पण्डितोऽहं। कस्मादायासि। वराहनगरात्। किन्नामधेयो भवान्। श्रीरामधननामाऽहं ब्राह्मणः। अहो भवान् पण्डितोसि सन्निधिमागम्यतां अस्मिन् दार्व्वासने समुपविश्यतां। सुखेनागतोसि कुशली भवान्। श्रीमतां सन्निकर्षेण जायते कुशलं क्षणात्। कस्मिन् कस्मिन् शास्त्रे भवतो विद्या विद्यते। व्याकरणादिशास्त्रे धर्म्मशास्त्रे च। भवान् दर्शनविद्यावान् न वा। अस्ति मे कस्मिन् दर्शने ऽध्ययनं। वाढं। वेदान्त शास्त्रे किमधीती भवान्। महाशय तदधीतवानहं। किं चेतसि समाधाय सम्प्रति समागतोसि। महाशय अवधीयतां एकं पण्डितमनुसन्दधासि भवन्निति श्रुत्वा तवान्तिकमागतोऽहं। हे पण्डित त्वया का का भाषा ज्ञायते। हे महाशय यतोऽहं संस्कृतशास्त्रे विद्यावान् अतएव

तद्भाषायां मम कौशलं विद्यत एव परन्तु वयं वङ्गोद्भवास्तस्मात्त-द्देशीयभाषाऽप्यस्माकमयत्नसुलभा इति। यस्मादस्माकं स्वाभाविकीयं वाणी। वाढं। तद्भवत उभयभाषायां कौशल्य मस्तीति विज्ञातं मया। अहन्तु प्रथमतः संस्कृतां भाषां शिक्षितुं प्रार्थये त्वं मां शिक्षयितुमर्हसि। हे महाशय यदि मामत्र संस्थापयसि तदाऽवश्यमेव शक्नोमि। त्वया मासि मासि का भृति र्लभ्यते। हे महाशय भवान् भर्त्ता धनाढ्योऽपि मामाश्रितं प्रति विवेचनेन यदायाति तद्विधीयतां। त्वमन्यं कमपि पाठितवान्न वा। आं अहमेकं विज्ञतमं त्रीन् वत्सरान् पाठितवान्। तेन च भवतः किमधीतं। प्रथमतो वङ्गदेशीयभाषा तद्वर्णविन्यासरीतिश्च परतः संस्कृतशास्त्रमपि। स तु कीदृग्विद्यावान् जातः। अधीतविद्यायां प्रशंसा लब्धा। हे पण्डित मन्निकटे पुस्तकं नास्ति तत् कुत्र लप्स्यामि। महाशय अहमेव दास्यामि तत्। किं भवता पुस्तकमानीय दातुं शक्यते। पुरा शिक्षार्थं पुस्तकप्राप्ति र्दुर्लभासीत्। इदानीमायासमन्तरेण पुस्तकं प्राप्तुमर्हति। कस्मिन् समये प्रतिदिनमागमिष्यामि। प्रत्यहं दश घटिकाभ्यन्तरे आगमनीयं। भद्रं तदानीमेवागमिष्यामि। आज्ञापय स्वस्थानं व्रजामि। भद्रं सुखेन गम्यतां। नमस्काराः सन्तु। नमस्काराः सन्तु।

## द्वितीयाध्यायः।

### मन्त्रयोः परस्परालापः।

महाशय आगम्यतां। बहुदिनान्ते साक्षाल्लब्धं। कथं वर्त्तते भवदीयानुग्रहेण कुशलेनासं। भवद्भ्रातरः कुशलिनः सन्ति। आं कुशलिनस्ते भवत् प्रसादात् परन्तु मम ज्येष्ठभ्राता रोगार्त्तो ऽभूत्। हा केन रोगेण पीडितो बभूव। वात रोगेण पीडितोऽस्ति। विशेषो ऽभून्नवा। सम्प्रति मनागुपशमो जातः। भद्रं शीघ्रमेव येन प्रतीकारो भवति तद्विधीयतां। इदानीं कश्चिच्चिकित्सति। कश्चिन्निपुणतरो महाशयः। भद्रं तदा त्वरितमेव प्रतीकरिष्यति। किन्त्वायं रोगः क्लेशसाध्य एव कति दिनानि क्लेशयिष्यति। अन्यद्भद्रं भवद्भवनस्य। परमेश्वरानुग्रहात् सर्व्वं भद्रमेव। भवत् पुत्रः किं करोति। लेखनं पठनं करोति। भद्रं सतु विद्याभ्यासे आविष्टो न वा। परन्तु बालक स्तथापि तत्रानुरागो वर्त्तते। भद्रं यत्नैः पाठयितव्यः। भवानधुना किं करोति केन वा भवतः परिवारपोषणं भवति। अहमिदानीं राजसन्निधौ तिष्ठामि। तेन च कस्मिन् कर्म्मणि मां नियोजयित्वा किञ्चिद्धनं दीयते लब्धेन तेन परिवारं पोषयामि। भद्रमवकाशवशेनात्र कदा कदाप्यागमनीयं त्वया। आमेवं सदैव भवत् सन्निधाने आगच्छामीति ममेच्छा। नह्येवं कार्य्यहानिं कृत्वा गमनीयं त्वया किन्तु सावकाशेन त्वया गन्तव्यं भवद्दर्शनेनाहं सुखीभवामीत्यस्मादेवं कथयामि। ममाप्ये-

तादृशी मनोवृत्तिं र्यथोच्यते भवन्। आलयं गच्छामि। इदानीं गमिष्यसि। अां वेलाऽभूदुपविश्य गच्छाम्यहं। नमस्कारोऽस्तु। ममापि नमस्कारोऽस्तु।

---

## ३ तृतीयाध्यायः।

### स्वामिभृत्ययोः कथोपकथनं।

हे महाशय रजनी प्रभाता शयनात् समुत्तिष्ठ। हे भृत्य जलमानय मुखं प्रक्षालयामि। समानीतं जलं गृहाण मुखं प्रक्षालय। अहो स्नानार्थं तैलमानीयतां। अद्य शीघ्रमेव वहिर्यास्यामि। अयि प्रभो किं तैलमानयामि। पुष्प वासितं तैलं। परिधेयवस्त्रं देहि। नीयतां महाशय। अहो भृत्य पानीयजलं समानय किमपि भक्षणीयमपि एवं मम मातरि निवेदय यत् शीघ्रमेवान्नं प्रेषयति। अयि महाशय श्रीमन्माता भवन्तमाकर्यति। कुत्रास्ते जननी मम। अन्तःपुरे भोजनगृहे। भृत्य मम मातरं एच्छ किं किं पक्वमऽभूत्। अयि महाशय मत्स्य मांसादिकं सर्व्वमेव प्रस्तुतं। इदानीं कथमाकयति माता। प्रस्तुतान्नं भोजयितुं। कथय व्रजामि। भृत्य ताम्बूलादिकमत्र स्थापयित्वा यानवाहानाकय। कति यानवाहानाकयामि प्रभो तदाज्ञापय। अद्य दूरे गन्तयमस्ति अष्टौ तानाकय। यथाज्ञमस्तु। मम भद्राणि वासांसि समानय। किं किं वस्त्रमानयेऽहं। सूक्ष्मं परिधेवस्त्रं उरच्छदं शिरोवेष्टनवसनं प्रावरणञ्च समानीयतां

तूर्णं। यथाज्ञं करोमि। अहो भृत्य। अयि प्रभो किं करोमि मामाज्ञापय। उपानद् युगलं पुरतो देहि परन्तु ममवेला प्रबोधकयन्त्रं कुत्र। प्रभो भवदीयदारुनिर्म्मित रम्य पेटकेऽस्ति। भद्रं निःसारय गृहीत्वा गच्छामि। भृत्य श्रूयतां दशमुद्रा निःसारयित्वा मद्यमानीय दीयतां प्रयोजनमस्ति। यथाज्ञमस्तु। पादप्रक्षालनार्थं जलं दीयतां। दत्तं गृहाण। वस्त्रान्तरं देहि एतद्वस्त्रमवधूय स्वस्थाने स्थापय। पानीय जल मानीयतां पिपासा बाधते च मां। सम्प्रति सायं वर्त्तते दीपः प्रज्वाल्यतां सच्छाधारे स्थाप्यतां आसनं परिष्कृत्य उपवेशनार्थं विस्तारय। यथाज्ञं प्रभो सर्व्वं विदधामि। महाशय रात्रिरभूदाज्ञा चेत् गृहं गच्छामि। भद्रं याहि किन्तु प्रभाते आगन्तव्यं। तदस्तु। ममतु किञ्चिन्निवेदनमस्ति। कथय। मम भ्राता गृहात् समागतः मम मासिकभृतिं कृपया देहि परदिने तं गृहं प्रेषयिष्यामि। भद्रं। श्वः प्रदास्यामि।

---

### ४ चतुर्थाध्यायः।

### पिता पुत्रयोः कथोपकथनं।

हे पितः कोमामसृजत् तत् कथ्यतां। पुत्रपरमेश्वरस्त्वां सृष्टवान् योहि द्यावा पृथिव्यौ सृष्टवान्। परमेश्वरः किं प्रकारः। परमेश्वरः परमात्मा एक एव तथैव शास्त्रे लिखित मस्ति एक ब्रह्म द्वितीयो नास्ति। मदर्थं परमेश्वरः किं करोति। सहि त्वां सर्व्वदा रक्षति प्रतिपालयति च

परमेश्वरविषयकमस्माभिः किं करणीयमस्ति। तदनुग्रह लाभार्थं यत्नस्तदाज्ञापालनञ्चास्माभिः करणीयमिति। तस्याज्ञा कीदृशी। न लोभः करणीय इति यतोहि शास्त्रे लिखितं लोभात् पापं प्रजायते पापान्मृत्युश्च भवतीति। अपराज्ञा कीदृशी। मानृतंवक्तव्य मिति यतोहि शास्त्रे लिपिरस्ति ये च मिथ्यावादिनो भवन्ति तेचात्र निन्दनीयाः परत्र निरयगामिन इति। अन्याज्ञा च। आत्मनः पिता माता च माननीयेति यस्माल्लिखितमस्ति येच माता पितरौ निर्भर्त्सयन्ति तेषां यावज्जीवमशौचं भवतीति। हे पितरऽन्याज्ञा वर्त्तते। आंवर्त्तते श्रूयतां। परदारान्नगच्छेत् न चौर्य्यं कुर्य्यात् माहिंस्यात् सर्व्वाभूतानि माविवदेदित्यादि। हे पितः अस्माकमन्यान् प्रति किं करणीयमस्ति। श्रूयतां वत्स। आत्मवत् अन्येषु प्रेम विदध्यात्। अतएव शास्त्रस्य लिखनं आत्मवत् सर्व्वभूतेषु यः पश्यति स पण्डितः इति। ये लोकाः परमेश्वरस्य सर्व्वाज्ञाः पालयन्ति तेषां किं फलं भवति। तदवधीयतां वत्स इहहि ते परमसुखं भुक्त्वा परत्रानन्तसुखभाजो भवन्तीति।

## ५ पञ्चमाध्यायः।

### गुरु शिष्ययोः कथोपकथनं।

अयि गुरो क्रमेण व्याकरणमभिधानं काव्यशास्त्रञ्च यद्यत् शिशूनां पठनीयमस्ति तत् सर्व्वं श्रीमता भवता पाठितं अहमपि ततः समधीतवान् इदानीमहं किमधीष्यामि तदाज्ञापय। हे शिष्य व्याकरणादि पाठेन संस्कृतशास्त्रे तवाधिकारोजातः संप्रति तत्वनिर्णयप्रधानं दर्शनशास्त्रमधीयतां। अयि गुरो कतिविधानि तानि दर्शनशास्त्राणि। अवधीयतां शिष्य तानि च षड्विधानि सन्ति। किमिति तेषां नामानि। वैशेषिक-न्याय-मीमांसा-सांख्य-पातञ्जल-वेदान्तानीति क्रमेण नामानि। अयि गुरो न्यायदर्शने मुनिना गोतमेन किं निरूपितमस्ति। श्रूयतां धीमन् तस्मिन् शास्त्रे षोडशैव पदार्थानिरूपिताः। तेन किं भवति। निरूपितपदार्थ ज्ञानानन्तरं नित्यसुखज्ञानविशिष्टं जगत् कर्त्तारमीश्वरं जानाति तज्ज्ञानान्मुक्तिरिति। हे गुरो तस्मिन्नेवं वर्त्तते तदावश्यमेव पठितव्यं मया। गुरो वैशेषिकाख्य दर्शने मुनिना कणादेन किमस्ति निरूपितं। शिष्य न्याय वैशेषिकयोर्मत वैलक्षण्यं नास्ति यः कश्चित्तयो विशेषो विद्यते सचावसरवशादवसेयः। गुरो मुनिना जैमिनिना मीमांसादर्शने किं निरूपितं। तस्मिन कर्म्म प्रधानके शास्त्रे कर्म्मणैव मुक्तिरिति

निरूपितं। कर्म्माणि च। यज्ञ-व्रत-तपो-दान-वेदाध्ययन प्रभृतीनि। हे गुरो सांख्य नामकदर्शने मुनिना कपिलेन किं निरूपितं तत् कृपया मामुपदिश। शृणु शिष्य प्रकृतेरधिष्ठानमात्रेण जगन्त्याविर्भवन्तीत्यभिधाय योगचर्य्यया हतपापानां तत्त्वज्ञानोदयस्ततोमुक्तिरिति निरूपितं। पातञ्जल दर्शने मुनिना पतञ्जलिना किं निरूपितं। श्रूयतां शिष्य चनक द्विदलवत प्रकृतिपुरुषयो र्जगत्कारणत्वमित्यादि निरूप्य योगाचारेण गतपापानां मुक्तिरिति निरूपितं। हे परम कारुणिकगुरो सर्व्वदर्शनसारे वेदान्ते मुनिना व्यासेन किं निरूपितमस्ति। श्रूयतां वत्स। जगत्कारणमद्वितीयं चिदानन्दरूपमेकमेव ब्रह्मेति निरूप्य ज्ञानाग्निदग्धपापानां मुक्तिरिति निरूपितं। हे गुरो एवमेव वेदान्तदर्शनं तदादौ मामध्यापय यदधीत्य परमेश्वरपरो भविष्यामि। शिष्य क्रमेण सर्व्वं पाठयिष्यामि संप्रति मया संक्षेपेण षड्दर्शनमत मभिहितं॥

# ३ तृतीय भागः।

## बालकानां कर्त्तव्य कर्म्मनिरूपणं।

### १ प्रथमाध्यायः।

हे बालकाः पितरि मातरि च यूयं प्रेम कुरुत। यतो युष्मासु तयोरप्यतिशयं प्रेम तौ हि युष्माकमाजन्मनः प्रतिपालनं कृतवन्तौ यदा यूयमतिशिशवः शक्तिहीना वक्तुं चलितुञ्चासमर्थाभूत्वा केवलमेव रोदनपरा दुःखप्रदाश्चासत तदापि तौ पितरौ युष्मासु स्नेहमकुर्व्वतां युष्मानरक्षताञ्च। जनकजननी वत् कोऽन्यः प्रेम करोति युष्मानुपदेष्टुम्वा को यतते। यत् यूयं जानीथ तत् को वा ऽशिक्षयत। एवमन्न-पान-वसनं-रात्रौ शयनार्थं शय्याञ्च त्वदर्थं को वा प्रस्तौति। युष्मासु तुष्टेषु को वा सन्तुष्टो भवति दुःखितेषु च को हि दुःखितो भवति। यदा च रोगेन व्याकुलिता यूयं तदा युष्माकं को दयते को वा यत्नं विधाय औषधं पथ्यञ्च प्रयच्छति एवमारोग्यं बलं मङ्गलञ्च युष्माकं को हि परमेश्वरात् प्रार्थयते। तस्माद्धि पितुर्मातुराज्ञां पालयत। यस्मात् यत् कर्त्तव्यमस्ति तत् युष्मभ्यो ऽधिकतरं तौ जानीतः तथा युष्माकं कुशलं प्रज्ञाञ्च अभिलषतः। अतएव यदि पितरौ व्याधितौ दुःखितौ वा भवतस्तदा तौ शुम-

यितुं यतध्वं। यदि तौ दरिद्रौ स्यातां तदापि तस्मिन् चेष्टध्वं येन तयोरुपकारः स्यात् एवं त्वदर्थं ताभ्यां कति क्षतानि कति चित् कष्टानि च प्राप्तानीति स्मरत॥

---

## २ द्वितीयाध्यायः।

अहो बालका भ्रातृषु बन्धुषु च प्रेम कुरुत तान् धिक्कारं मा कुरुत। कदाचिदपि तान् मा प्रहरत। तेषां किमपि प्रियवस्तु गृहीतुं माभिलषत तस्यालाभे च तेभ्यो मा क्रुध्यत। तव चेत् किमपि प्रियवस्तु तदा सदसद्विभज्य तेभ्यः प्रयच्छत। युष्माकं कलहं विलोकयन्तौ पितरौ शोचतः। तथा यूयं परस्परं प्रेम कुरुत समतायामेकवाक्यतायाञ्च वर्त्तध्वे पितराविति प्रार्थयेते। यदि पितृ-मातृ-भ्रातृ-भगिनीषु भङ्गं आचरथ तदा लोका युष्मान् निन्दिष्यन्ति परन्तु केपि नादरिष्यन्ते च। एवमेते वदिष्यन्ति ये च वङ्क्लेशेन परिरक्षितेोः पित्रोरभिन्न - पितृ - मातृकेष्वेक गृहप्रतिपालितेषु भ्रातृ - भगिन्यादिषु च न प्रेम कुर्व्वन्ति तेषां कथमन्येषु प्रेम॥

---

## ३ तृतीयाध्यायः।

नान्येषां वस्तुना किञ्चित् कुरुत। अनुमतिमन्तरेण कस्यापि वस्तु न नयत। हे बालकाः मातापित्रोरपरस्याप्युद्यान सम्भवे पुष्पफले विनैषामाज्ञां न गृह्णीत। मिष्टान्नमन्यद

किमपि वस्तु संगिबालकेभ्यस्तदनिच्छया मा गृह्णीत। यदि मातापितरौ दरिद्रौ तथापि तयोर्भक्षणार्थं शाकमपि न चोरयत। यस्मात् शाकं चोरयित्वा जातसाहसोजनः फलं चोरयति तदपहरणात् साहसिकोभूत्वा सुवर्णरजतादिकं चोरयति। एतद्वस्तु निर्मूल्यमत्यल्पञ्चेति अस्यापहरणे न कोपि मां ज्ञास्यति नापि कश्चिद्दण्डीभविष्यतीति पामरोयद्वदति तथा चौर्य्यं चिकीर्षवो यूयं मा वदत किन्तु प्रत्येकमेवं वदत नाह-मपहरिष्यामि। अत्र च यद्यन्यो मां न पश्येत् तथापि परमेश्वरो मां पश्यति। परन्तु येच लोका मां जानन्ति तेहि मद्दोषान् प्रकाशयिष्यन्ति एवं राजदण्डं प्राप्स्यामि तथा निन्दितोऽहं चौर्य्यदोषेण दूषितो भविष्यामि। कोपि मम सन्निधौ न किञ्चिन्न्यसिष्यति। अनेनाहं महान् दुःखितो भविष्यामि। एवं परमेश्वरो मयि न सन्तुष्टो भविष्यति। यस्मात् त्वस्तेयमेकाज्ञा मा चोरयतु इति॥

---

४ चतुर्थाध्यायः।

अहो बालका मिथ्यावाक्यं मा कथयत। यदा युष्माभिर्यत् किमपि दृष्टं श्रुतम्वा तदा तदविकृतमेव यूयं वदत। आश्चर्यं श्रावयितुं मिथ्याकल्पितं मा वदत तथा तद्रचनां मा कुरुत। यदि युष्माभिः किमपि विस्मृतं तदैवमेव वक्तव्यं तदस्माभिर्विस्मृत-मिति येतु सत्यमेव प्रेम कुर्वन्ति तेहि मिथ्यावाक्यं परिहासे-नापि न वदन्ति। यदा यूयं कामपि प्रतिज्ञां कुरुत तदा

मनसि विचारयत। यदि प्रतिज्ञातं कर्म यूयं न कुरुत तदा मिथ्यावादिनो भविष्यथ। तेन युष्मान् को विश्वसिष्यति। ये तु निजप्रतिज्ञां पालयन्ति सत्यमेव कथयन्ति च तैर्व्विना नान्ये विश्वस्ता भवन्ति। यद्यपराधं कुर्व्वथ तदा शासनं विजानन्तोपि यूयं मापक्रुध्वे। यदि यूयं कृतापराधेनानुतापिता भवथ पुनरपिच न कुरुथ तदा लोका युष्मभ्यं न क्रुध्यन्ति न युष्मान् शासति च। लोकाहि युष्माकं सत्यवचनेन युष्माभिः सह प्रेमानं करिष्यन्ति युष्माकं वचनमपि प्रमाणयिष्यन्ति। यस्मात् स्वदोषं गोप्तुं शासनं वारयितुञ्च यूयं न मिथ्यावाक्यं कथयथ। मिथ्या कथनमनुचितमतितुच्छं गर्हणीयं पापमयञ्च ये तु मिथ्यावाक्यं वदन्ति तेषां तदानीं तदनन्तरं वा तत् यक्तं भवति। युष्माभिर्म्मृषा न वक्तव्यमिति परमेश्वरेणोक्तं। यस्मात् परमेश्वरो मिथ्यावादिनः प्रति क्रुध्यति तान् दण्डयति चेति॥

---

## ५ पञ्चमाध्यायः।

हे बालकाः कमपि जनं प्रति दुष्टं वाक्यं मा कथयत। नहि केनापि सह विवदध्वं। नत्वऽसन्तुष्टे विवादशीलैश्च सह कोहि प्रेम करोति तैः सार्द्धं कोवा वस्तुमिच्छति तांश्च सन्तोषयितुं को यतते। तेपि क्वचित् हृष्टाः सन्तुष्टाश्च न भवन्ति ते तु सुखभाजो न भवन्ति तेषां चेतसि बहूनि दुःखानि भवन्ति ते स्वीयं कृतदोषं जानन्ति तैः सह ये लोका वसन्ति तेपि तान् प्रति प्रेमानं न कुर्व्वन्ति। तथा सर्व्वे लोकाः प्रेमाविष्टं

विशिष्टं प्रति यथानुगृह्णन्ति तथाताननुग्रहीतुं नेच्छन्तीति ते च जानन्ति। यदा यूयं कस्मिंश्चिदिष्टविषये हताशा भवथ तदा दुःखिनो रोदनपरा विशीर्णवदनाश्च भूत्वा आत्मीयेभ्यो जनेभ्यो दुःखं मादत्त। तस्मिन्निष्टविषये नहि चिन्ताकुला भवत। परन्तु अन्यस्मिन् साध्यविषये आत्मानं विनोदयत तथा सन्तोषयत एवं नियोजयत। नहि केपि सर्व्वमिष्टं प्राप्नुवन्ति॥

---

## ६ षष्ठोऽध्यायः।

हे बालका यदि यूयं वृद्धान् विकृतान् खञ्जादींश्च पश्यथ तदा तान् भ्रूभङ्ग्या मावलोकयत तानपि नोपहसत न वा कौतुकं कुरुत। यदि चेदानीं यूयं युवानो निरामयाश्च तथापि रोगिणः कृशा विवर्णा दुर्ब्बला विरूपाश्च भवेत। अधः पतनेनच युष्माकं पादो पृष्ठश्च भग्नं भवेत। एवं यूयं खञ्जा विरूपाश्च भवेत। यदा यूयं वृद्धास्तदा युष्माकं केशाः शुक्ला भविष्यन्ति निपतिष्यन्ति च दन्ताश्च युष्माकं विनंक्ष्यन्ति युष्माकं मुखं बलिभि र्व्याप्तं भविष्यति क्षुद्रबालकवत् यूयमतिदुर्ब्बलाश्च भविष्यत। यदा यूयं बधिरा अन्धाः खञ्जा वा तदा दुष्ट बालका यदि युष्मानुपहसन्ति कौतुकं वा कुर्व्वन्ति तत् किं युष्मभ्यो रोचते नेति। सर्व्वे लोका युष्मासु यद्दयां कुर्व्वन्ति युष्माननुगृह्णन्त्युपकुर्व्वन्ति च एतेष्वेव युष्माकमभिरुचिरित्यहं निश्चयं जाने॥

## ७ सप्तमोऽध्यायः ।

हे प्रिय शिशवोऽन्येषां पुंसां पशूनाम्वा दुःखमुत्पाद्य माभिनन्दत। बहवः पशवो मांसार्थं बध्या भवन्ति अन्ये च हिंस्राः पशवो ऽस्माकमविनाशाय बध्या भवन्ति। यद्बालकाः पक्षिचरणानि समुत्पाद्य मक्षिकाकुलं संहरन्ति यदपि शलभान् गृहीत्वा मर्द्दयन्ति तथा कोमलातिशय सुखदान्नीडात् पक्षिणां शावकं विधृत्य आनयन्ति यदपि च चर्म्मकशया लोहित दर्शनपर्य्यन्तं घोटकं ताडयन्ति तत् किमर्थमिति न जाने। एकः पशुरन्यं पशुं हन्ति वृको मेषान् हन्ति। चिल्ल श्येनगृध्रा क्षुद्र पक्षिणो घ्नन्ति क्षुद्रपक्षिणः किसुलुकान् मक्षिका श्च घ्नन्ति किन्त्वेते भक्षणार्थमेतान् घ्नन्ति न पुनर्दुःशीलबालकवत् कौतुकार्थं। अतएव कीट पक्षि पशूनां विनाशेन क्लेशेन च यत क्रीड़नं तदतीव क्रूरतर मिति॥

---

## ८ अष्टमोऽध्यायः।

हे बालका यूयं किमपि वस्तु मा पचयत। यदि युष्माकं वहूनि वासांसि भक्ष्याणि च सुस्तथापि तानि मा नाशयत नवा निक्षिप्यत परन्तु येषां बालकानां वस्त्रं भक्ष्यम्वा नास्ति यूयं तेभ्य स्तद्दत्त भवन्माता पितरौ वा दातुं प्रार्थयध्वं। यद्गृहे यूयं निवसथ तत्र चेत कोऽपि पीडितो भवेत् तदा उच्चैःशब्देन तस्य कष्टं नोत्पादयत किन्तु यथाशक्ति तत्प्रतीकाराय यत्नं कुरुत

यदा यूयं पीडिता भवेत तदा सहिष्णवो भवत मा रुदत ये लोका युष्माकं सेवां कुर्व्वन्ति तेभ्यो मा क्रुध्यत यद्यदौषधं पथ्यम्वा युष्मभ्योदत्तं भवेत् क्रोधवचनमनुक्त्वा भ्रूविकारञ्चाकृत्वा तत्तत् गृह्णीत। औषधंहि न रुचये किन्त्वारोग्याय इति॥

---

## ९ नवमोध्यायः।

सुस्थाः सुस्थदशायां शरीरे मालिन्यं मा वहत। यूयं निज-हस्त- पाद- केशादीन् निर्म्मलान् विधत्त निज वस्त्रञ्च यत्नतः परिरक्षत येन तद्रुचिरं दृश्यते। मलिने जने दृष्टे सन्निहिते च महानऽसन्तोषो जायते। ये बालका अपरिष्कृता मलिनच्छिन्नवस्त्रान्वितास्च तेभ्यो हि स्वच्छाः शुभ्रवसना बालका बलवन्तः सुस्थाः सन्तोषशीलाः सुखिनो भवन्तीति॥

---

## १० दशमोध्यायः।

युष्मभ्यो यदुचितं वस्त्रं भक्षणीयञ्च दत्तं स्यात्तस्मिन्दोषारोपं मा कुरुत। यद्यप्येतस्मादितरत् वस्त्र भक्ष्यं युष्मभ्यो रोचते तथापि तत्रैव कृतज्ञा भवत। उपयुक्ताहाराधिकतरं भक्षणं मा कुरुत यस्मादपरिमितभोजिनो जना अक्षरा उच्यन्ते तेपि च बुद्धि हीना अलसा निद्रालवो भवन्ति। एवं तेषां शिरस्युदरे च मुहुर्महती वेदना जायते। यानि द्रव्याणि युष्माकं

सन्ति तानि यत्नेन रक्षत यदि युष्माकं पेटकादिपात्रं स्यात् तदा तदपि यत्नतः परिरक्षत। ये लोका उचितस्थाने आत्मनो वस्तु स्थापयन्ति ते हि प्रायेण क्वचिदपि न किञ्चिदपहारयन्ति। यद्यत् प्रयोजनार्थं यदा भवति तत् कुत्रास्ते इति ते तदा जानन्ति न हि तदन्वेषणे तेषां कालात्ययो भवतीति॥

---

## ११ एकादशोऽध्यायः।

ये बालका मृषावाक्यं कथयन्ति चोरयन्ति विवदन्ति दुर्वचो वा वदन्ति तैः सार्द्धमालापान् मा कुरुत। यस्मात्तेषां सहचारेण यूयं तद्रूपा भविष्यथ। एवमन्ये जनास्तैः सार्द्धं युष्मान् दृष्ट्वा चेदं बुध्यन्ते यूयं हि तैः समाः। यस्मिन् गृहे यूयं निवसथ तत्र चेत् केपि मन्दमाचारं कुर्व्वन्ति तद्दृष्ट्वा यूयं मन्दं माचरत यदि ते पश्यन्ति यूयं भद्रतरा इति तदा तेपि भद्रमाचरिष्यन्तीति दुष्टाचारशिक्षा नोत्तमानामुचिता किन्तूत्तमाचारशिक्षा दुष्टानामप्युचितेति॥

---

## १२ द्वादशाध्यायः।

हे बालका यद्धि लोकाः संगोपयन्ति तद्विज्ञातुं मा यतध्वं अनुमतिमन्तरेणान्येषां समागतां लिपिं मा पठत यदपि लोका-लिखन्ति तदपि मा पठत। यस्मात् यत् तत्र किमपि गुप्तं

तल्लोका दर्शयितुं नेच्छन्ति। अगोचरे वहिरवस्थितः कुत्रापि परेषां मन्त्रणां मा शृणुत॥

---

## १३ त्रयोदशाध्यायः।

युष्माकं गुरवो यद्यदाज्ञापयन्ति तदेव कुरुत। लिखनं पठनमन्यदपि च यत् किञ्चित् मातापितृभ्यां निरूपितं यूयं शिक्षितुं चेष्टध्वं। पितृतो मातृतो बन्धुभ्यश्च युष्माकमधिकं ज्ञानमिति मा बुध्यध्वं। युष्माकं वयसस्तेषां वयोऽप्यधिकं तेहि वह्वीर्विद्याः पठितवन्तो दृष्टवन्तः श्रुतवन्तश्च यासां किमपि यूयं न जानीथ। किन्तु यूयं नवीनशिशुभ्यो ऽधिकं जानीथ यतो युष्माकं वयस्तेभ्योऽप्यधिकं। परन्तु ज्येष्ठ बालका युष्मभ्योऽधिकं जानन्ति। ज्येष्ठ बालकेभ्योप्यधिकतरं मानवा जानन्ति। यद्यत् पुस्तकं पिता माता गुरवश्च ददति तद्विना नान्यत् पुस्तकं पठत। केषाञ्चित् पुस्तकानां पाठोऽनुचित एवं तानि च दुष्टसङ्गा इव दुष्टतां बोधयन्ति। परन्तु मन्दपुस्तकपाठात् पाठविरहोपि नृणां श्रेयान्॥

---

## १४ चतुर्दशोध्यायः।

हे शिशवो ऽस्माकं माता पिता चास्मान् प्रति स्नेहवान् किन्तु परमेश्वरस्ताभ्यामधिकतरोदयालुः। एवमस्माकं हिताय माता

पितृतोऽप्यधिकतर चेष्टावान् तेनैवास्मभ्यो माता पित्रादिकं सर्व्वं दत्तं। सहि मानुषो न किन्तु सर्व्वेभ्यो मानुषेभ्यो ज्ञानवान् श्रेयांश्च स हि शशि- भास्कर- तारकाः- द्यावा- पृथिव्यौ- जल- वृक्ष- कुसुमानि पशु- पक्षि- मीन- कीटान् नर-नारी-बालकांश्च सृष्टवान्। स हि पशुगणेभ्यो अस्मानुत्तमान् कृतवान्। यतोऽस्मभ्यो विशेषात्मा तेन दत्तः। येनात्मना वयं जानीमः स सर्व्वशक्तिमान् ज्ञानवान श्रेष्ठश्चेति। नहि पशवः परमेश्वरं जानन्ति तत् सृष्टानि वस्तूनिच। यदि तेभ्योवयं कथयामस्तदा तेन बुध्यन्ते वयं बहु जानीमो यत् ते न जानन्ति किन्त्वस्माकं शरीरं पशु शरीरवत् विनंक्ष्यति। यदास्माकं शरीरं श्मशानभूमौ समर्पितं भवति तदा कीटास्तद्भक्षयन्ति। अस्माकमस्थि धूलिसात् भविष्यति किन्त्वस्माकमात्मा शरीररहितः कदापि न मरिष्यति। परमेश्वरः सर्व्वं निरूपितवान्। सचास्मान् जीवयति स्वेच्छयाच संहरति। नहीदृशं कर्म्म यन्न परमेश्वरः कर्त्तुं शक्नोति सहि दिवा रात्रौ सर्व्वत्रास्मान् पश्यति एवं यद्यद्वयं कुर्मः कथयामश्चिन्तयामश्च तत् सर्व्वं जानाति। तदपि नास्ति यन्न परमेश्वरो जानीते इति॥

---

## १५ पञ्चदशोध्यायः।

परमेश्वरं प्रति प्रेमाविष्कर्त्तुमुचितं साधवः परमेश्वरं प्रति सर्व्ववस्तुभ्यः सर्व्वजनेभ्योप्यधिकं प्रेम कुर्व्वन्ति ते च तद्विषय तत् कृतोपकारान् अचिन्तयित्वा कदापि प्रातर्नोत्तिष्ठन्ति न च

राज्ञा कदापि न शेरते दिवसेपि पुनः पुनस्तद्विषयान् ध्यायन्ति। एवं तदीयगुणकथां कथयितुं श्रोतुं पठितुञ्च सदाभिलषन्ति परमेश्वरस्य पुरत एवं प्रकारेण प्रार्थना कर्त्तव्या भवति। हे परमेश्वर भवान् सर्व्वश्रेष्ठः सर्व्वेभ्यः प्रशंसनीयः। भवानस्माकं सर्व्वान् दोषान् क्षमिष्यति तथास्माकं चेतसि सुचिन्तां जनयिष्यति। येन च वयं दिने दिने चाधिकतरसुशीला भवामस्तद्विषये भवानुपकरिष्यति। एवमस्मभ्यं मातापितृभ्यां बन्धुभ्यश्च आशिषं दास्यति एवं यद्यत् प्रयोजनं तदस्मभ्यं प्रदास्यतीति। परमेश्वरस्य यथाज्ञा तदनुरूपकर्म्म लोकान् प्रत्यस्माभिः कर्त्तव्यमेव। तस्येदृगाज्ञा यद्यपि लोका अस्मान् विद्विषन्ति तथापि तान् प्रति वयं न द्विष्मः किन्तु लोकेभ्यो यथा प्रार्थयामहे तथैव तान् प्रति वयं कुर्म्मः॥

परमेश्वरस्याज्ञां पालयन्तो वयं श्रेष्ठाः सुखिनश्च भवामः। यदि तामाज्ञां विलङ्घयामस्तदा परमेश्वरोऽसन्तुष्टः सन्नस्मान् दण्डयिष्यति। स हि वहुधास्मान् दण्डयितुं शक्नोति। यदस्माकं बन्धुजनान् संहर्त्तुं सर्व्वद्रव्याणि च गृहीतुं समर्थो भवति एवं हि परमेश्वरो नित्यमस्मभ्यं दुःखं दातुं शक्नोति। यदि वयं सुशीला भवितुं तदाज्ञां प्रतिपालयितुञ्च प्रार्थयामहे तदा परमेश्वरोऽस्माकमुपकरिष्यति आशिषोपि दास्यति मनसि च सन्तोषं वितरिष्यति। तथास्माकं मरण समये देहप्राणवियोगानन्तरं मोक्षस्थाने चास्मान् नयिष्यति तत्र स्थित्वा वयं सकलमर्त्यलोकेभ्योप्यधिकं परमेश्वरं ज्ञास्यामः प्रेमाणं करिष्यामस्तोष्यामश्च तदा वयं न शोचिष्यामः। न पुनर्दोषा

नाचरिष्यामः मर्त्या यद्रूपा भवितुं न शक्नुवन्ति वयं तादृशा ज्ञानवन्तः सुखिनश्च भविष्याम इति ॥

---

# चतुर्थ भागः।

## नीति विषये दृष्टान्तकथा।

### १ हरिण-सिंहयोः प्रस्तावे दृष्टान्तः।

एकदा एक हरिणपशु र्व्याघ्रभयात् पलायमानो गर्त्तं प्रविवेश। तत्रचैकोमहान् सिंहस्तमाचक्राम। मरणसमये हरिण पशु र्मनसेदं वक्तुमारब्धवान् आः कष्टं ममेयं का दुर्दशा घटिता। यतो मनुष्यभयात् पलायमानोऽहं ततोधिकभीषण हस्ते न्यपतं इति। यथा

वृश्चिकभिया पलायमानस्याशी विषमुखे निपातः ॥

---

### २ शशकी-व्याघ्री प्रस्तावे दृष्टान्तः।

एका शशकी व्याघ्रीसमीपमागत्येदं जगाद हे व्याघ्रि मम प्रतिवर्षं बहवः पुत्रा भवन्ति भवत्यास्त्वऽस्मिन् जन्मनि एको द्वौ वा पुत्रौ भवतः। व्याघ्री प्रहस्योवाच तवैतत् बहुभ्यः पुत्रेभ्यः श्रेयान् मम एकः पुत्रः। यथा

वरमेकोगुणी पुत्रो नचमूर्खशतैरपि।
एक चन्द्रस्तमोहन्ति नच तारागणैरपि ॥

३ एकस्त्री-हंसयोः प्रस्तावे दृष्टान्तः।

एकस्या स्त्रिया एका हंसी आसीत् सा वरटा प्रतिदिनमेकं रजताण्डं प्रासोष्ट। एकदा सा स्त्री मनसैवं विवेचयामास यद्यहं वरटाया आहारं वर्द्धयामि तदा एषा द्वे द्वे अण्डे दिने दिने प्रसविष्यते। अनन्तरं बहुतरं भोजयितुं सा तां प्रावर्तत तेनैव प्रचुराशनेन विदीर्णकुक्षिर्हंसी ममार। यथा

अलभ्यं लब्धुकामस्य जनस्य गतिरीदृशी।
अलभ्येषु मनस्तापः सञ्चितार्थो विनश्यति॥

---

४ मशक-वृषभयोः प्रस्तावे दृष्टान्तः।

एकदैकमशको विपुलवृषविषाणाग्रे उषित्वेदं चिन्तयामास वपुषाहं महान् गुरुः। अनन्तरं उवाच स भो वृषभ ममोपवेशनेन भवतो यदि भारबोधः स्यात्तदा उच्यतां अहं स्थानान्तरं व्रजामि। वृष उवाच अरे मशक कुत्रोपविष्टोऽसि तन्नजाने कुत्र वा पीडयसि तदपि न जाने इति। यथा

अशक्ताः शक्तिमात्मीयां श्लाघन्ते येच दुर्जनाः।
ते भवन्त्युपहासाय महतामेव सन्निधौ॥

---

५ मृत्यु-मनुष्ययोः प्रस्तावे दृष्टान्तः।

एकोमनुष्यः स्कन्धे काष्ठभारं वहन् जगाम। अनन्तरं तद्भारवहनादतिक्लान्तो भूत्वा स्कन्धतः काष्ठभारं तत्याज।

अपिचात्मनो मृत्युं प्रार्थयामास। मृत्युस्तत्क्षणादेव तत्रोपस्थाय कथितवान् अहो किमर्थं मामर्थयसे नरस्तमुवाच मम स्कन्धे काष्ठभारोत्तोलनाय त्वां प्रार्थयेऽहं। यथा

जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः।
धनाशा जीविताशा च जीर्य्यतोपि न जीर्य्यति॥

---

६ कच्छप शशकयोः प्रस्तावे दृष्टान्तः।

एकस्मिन् समये एकः शशकः कच्छपेन सह प्रतिज्ञां चकार अहो इतः पर्व्वतपर्य्यन्तमावां प्रधावावः। ततस्तौ पर्व्वतं प्रति प्राधावेतां। शशकः स्वीयक्षीणतया लघुतया द्रुतगतिभिरति श्रान्तो भूत्वा पथि निद्रामभजत्। कच्छपस्त्वात्मनः शरीरगुरुतया मन्दगामित्वेन च हेतुना गमनान्न विरराम। ततः क्रमरहित एव स पर्व्वतं प्राप्तवान्। शशकस्तु जागरितो भूत्वा ददर्श कच्छपोऽत्र नास्ति ममाग्रे प्रस्थितवान्। ततः स लज्जान्वितो बभूव। तदानीं तल्लज्जा विफला इति। यथा

सप्रमादेन बलिना दुर्व्वलस्य प्रमादिनः।
युद्धे बलवतो नाशो भवेत् तस्य प्रमादतः॥

---

७ मालाकार-कण्टक वृक्ष प्रस्तावे दृष्टान्तः।

मालाकारं प्रत्येकः कण्टकवृक्षो निजगाद यद्यहमुपवनमध्ये यत्नतः केनापि रोपितः स्यां तथा जलाभिषेचनेन वर्द्धितः

ष्यां तदा मत् प्रभवानि फलपुष्पानि राजानोपि द्रष्टुमिच्छन्ति एतत् श्रुत्वा मालिकस्तं कण्टकतरुं प्रशस्तभूमौ रोपयामास। अपिच प्रतिदिनं सायं प्रातः समये तं सिषेच। एतेनच तरोः कण्टकाः सुविस्तृता दृढाश्च बभूवुः। सहि पार्श्वस्थान् वृक्षानपि शाखाभिरधरीचकार अन्येषामपि वृक्षाणां हानिश्च। ततः क्रमशस्तस्य मूलानि वर्द्धितानि भूत्वा समस्तं वनं वेष्टयामासुः परन्तु कण्टकभयात् तत् सन्निधाने कोपि गन्तुं न शक्नोति॥ यथा

एकेनापि कुवृक्षेण कोटरस्थेन वह्निना।
दह्यते च वनं सर्व्वं कुपुत्रेण कुलं यथा॥

---

८ कृष्णाङ्गपुरुष प्रस्तावे दृष्टान्तः।

एकः कृष्णवर्णः पुरुषः परिहित वस्त्रं त्यक्त्वा घनीभूतं तुषारं गृहीत्वा गात्रे लेप्तुमुद्यतवान्। तत्र केनाप्युक्तं अहो गात्रे कथमेवं तुषारं लिम्पसि। स प्रत्युवाच श्वेताङ्गो भवितुमिति। ततः कोपि विज्ञः समागत्य प्रोक्तवान् अहो त्वं कृष्णवर्णोसि कथमात्मशरीरं क्लेशयसि। यतो भवच्छरीरं शुभ्रं तुषारं कृष्णं विधातुं शक्नोति तुषारस्तु भवच्छरीरे कृष्णत्वं नाशयितुं न प्रभवति। यथा

रक्ता च जवया मुक्ता जवा शुभ्रा न मुक्तया।
भवेत् परगुणग्राही महीयानेव नापरः॥

९ सिंहैक-वृषभद्वय प्रस्तावे दृष्टान्तः।

एकदैकसिंहश्चरन्तौ द्वौ वृषभौ दृष्ट्वा हन्तुं निर्जगाम। ततस्तौ वृषभौ मिलित्वा जिघांसुं सिंहं शृङ्गैस्ताडयामासतुः। परन्तु निजसमीपे चोद्यतगतं तं निवारयामासतुः। ततः पराभूतः केशरी वञ्चयितुकामो दूरतस्तावुक्तवान् हे वृषभौ युवां यदि पृथक् भूय चरतं तदाहं युवयोः किमपि न वदिष्यामि इत्येवं सिंहवचसा प्रत्ययितौ तौ पृथक्क्रमभजतां। ततः सिंहेन तावुभौ निहताविति। यथा

अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका।
तृणै र्गुणत्वमापन्नै र्बध्यन्ते मत्तदन्तिनः॥

---

१० विस्तृतशृङ्गस्य मृगस्य प्रस्तावे दृष्टान्तः।

एकदा मध्याह्नसमये एको विस्तृतविषाणमृगः पिपासाकुलितमना जलाशयं गत्वा पानीयं पपौ। स तु तज्जले प्रतिविम्बितात्मशरीरं क्षीणमवलोक्य विषसाद किन्तु निजविशालशृङ्गद्वयमालोक्य हृष्टतरो बभूव। अनन्तरमकस्मात् समागतेषु व्याधेषु हरिणः पलायितो दूरं वनं प्रविवेश। ततोव्याधास्तं निहन्तुं तदानीं नाशक्नुवन् यदासौ भिया पर्व्वतस्य काननं प्रस्थितवांस्तदा दीर्घेण शृङ्गेन शाखानिबद्धमृगो व्याधैः सन्ताडितो ममार। किन्तु आसन्नसमये मृगः सखेद

इदमुवाच हा यानेव हस्तपादादीनहमवज्ञातवान् तेच मां ररक्षु याभ्यान्तु जीवनाशासीत् तौ घातयामासतुरिति। यथा

समये सुहृदः सर्व्वे सुखसम्पत्तिलिप्सया।
विपत् काले च सुहृदः स्वाङ्गान्यपिच नात्मनः॥

---

## ११ हरिण दृष्टान्तः।

एकस्मिन् समये एको हरिणो व्याधिना पीडिततरो बभूव। तदानीं तत् स्वजना बान्धवाश्च पशवस्तमालोकयितुं समाजग्मुस्तेच हरिणवासस्थलमभितः सरसशुष्कतृणपल्लवानि यान्यासन् तानि समग्राणि भुक्तवन्तः। अनन्तरं हरिणपशु र्निजपीडोपशान्तौ किञ्चिद्भोक्तुकामो भोजनीयमलभमानः क्षुधया प्राणान् विजहाविति॥ यथा

यस्यैव बहवः पोष्याः स्वल्पाश्च विभवाः पुनः।
भवन्ति तस्य क्लेशाय पोष्यास्ते विभवा अपि॥

---

## १२ सिंह-वृषभप्रस्तावे दृष्टान्तः।

एकस्मिन् समये एकः सिंहो महान्तं बलीवर्द्दमेकं निहन्तुं निजचित्ते ऽवधारयामास। किन्तु बलीवर्द्दस्य बलाधिक्यात् केशरी तस्यसमीपमपि यातुं नाशक्नोत्। ततस्तं बलीवर्द्दं छलयितुं शनैस्तत्समीपमागत्य सिंहो निजगाद अये बलीवर्द्द

अहमेवं पीनाङ्गं मेषशावकमुपजघान। अतो ममैषो ऽभि-लाषो यदद्य रात्रौ मद्भवने समधिष्ठितेन भवता भोक्तव्यमिति। एवं तेन निमन्त्रितो महाबलो बलीवर्द्दः स्वीचकार। अतएव यदा रात्रौ बलीवर्द्दः सिंहालये जगाम तदा प्रचुरकाष्ठं पाक-स्थालीञ्च ददर्श। एतदवलोक्य बलीवर्द्दः शंकाकुलितमना निज-मन्दिरमागच्छत् ततो हताभिलाष केशरी बलीवर्द्दमुवाच। अहो कथमत्र समागत्य भवान् गच्छति। बलीवर्द्द उवाच। अहो सिंह त्वन्मनोगतं जानामि नहि मेषशावकपाकार्थमेतादृक् समारम्भस्तव। परन्तु विपुलतरस्य कस्यचित् पाकायेति। यथा

शत्रुवाक्यमृतं मत्वा तेन सौहृद्यमार्जवं।
नहि धीरेण कर्त्तव्यमात्मनः शुभमिच्छता॥

---

१३ सिंह-जम्बुक प्रस्तावे दृष्टान्तः।

एकः सिंहो वयोवाहुल्यात् जरयाभिभूय भक्षणार्थं कमपि प्राणिनमाहर्त्तुं न शशाक। अतो भक्षणाभिलाषी सिंहः प्रतारयितुमनाः छलेनैकगर्त्तमध्ये तस्थौ। येच जन्तवस्तमालो-कयितुमागच्छन्ति तानिह गर्त्ते विधृत्य भक्षतीति। एकदैक-स्तुन्दश्शृगालः सिंहसमीपं गत्वा विवरद्वारि स्थित्वाच तं प्रणम्य निजगाद हे मृगेन्द्र त्वं कुशली। तमाह स अहो जम्बुक कथं गर्त्तस्यान्तरं नायासि। जम्बुक उवाच हे मृगराज अहमत्रागत्य बहूनां प्रवेश चिह्नं पश्यामि किन्तु निर्गमचिह्नं नालोकयामि॥ यथा

नकिञ्चित् सहसा कार्य्यं कार्य्यं कार्य्यविदा क्वचित्
क्रियते चेत् विविच्येव तेन भग्नं पुरस्क्रिया॥

### २४ सिंह-मनुष्य प्रस्तावे दृष्टान्तः।

एकदा केनापि सिंहेन सह एकस्य पथिकस्य साक्षादभूत्। ततः परस्परस्य बलविक्रमकथने तयोर्व्विवाद आसीत्। सिंहो निजबलप्रतापयोरातिशय्येन हृष्टचित्तो बभूव। इत्यवसरे मनुष्योऽसौ भित्तिप्रदेशे चित्रयित्वा इदमदर्शयत् यदेको मनुष्यः केशरिगलदेशे चुष्यतोत्येवं विधाय। सिंहमवलोक्य जहास। तदा केशरी चेदमुवाच यदि सिंहो मनुष्यवत् चित्रकरः स्यात् तदा नहि सिंहस्य गलेचोपको नरः स्यात् वरं मनुष्यस्य गलेचोपकः सः स्यादिति। यथा

दुष्टेन साक्षिभावेन न नरः शुद्धिमृच्छति।
नहि पङ्काम्भसा क्षालात् वासो वै शुद्धिमाप्नुयात्॥

### २५ मर्कटक-मधुमक्षिका प्रस्तावे दृष्टान्तः।

एकदा मर्कटक एकां मधुमक्षिकामिदमुवाच यदि भवति मामनुचरं करोसि तदाहं भवत्याअनुरूपो भूत्वा मधु सञ्चेतुं शक्नोमि। इत्युनेनाभस्य वचनात् मक्षिका स्वीचकार परन्तु यदासौ मर्कटको नाशक्नत् तदा मधुमक्षिका क्रोधात् तं मर्कटकं शूकेन विदारयित्वा मारयामास। सतु मर्कटको मधुलोभात् प्राणान्

अहो। अवसानसमये मर्कटकेनेदमुक्तं हा येनाहं दुर्दशा-
क्रान्तोऽभवं तस्मिन् कथं मम प्रवृत्तिरासीत्। साधारणरस
सञ्चयाद्धमोहं कथं माध्वीक माहर्तुमुद्यतवानिति॥ यथा

अक्षमः क्षमतामानी क्रियायां यः प्रवर्त्तते।
सहि हास्यास्पदत्वञ्च लभते प्राणसंशयं॥

---

१६ पथिक-बालक प्रस्तावे दृष्टान्तः।

एकदैक बालको दैवात् नद्यां पपात सतु सन्तरणानभिज्ञः पयसि निमग्नकल्पो भूत्वा पथि पथिकमेकमवलोक्य उद्धरणार्थं माजुहाव सच पथिकः सरित्तीरमागत्य जलनिमग्नबालकं निर्भर्त्सयामास। बालकः कष्टेन तं निजगाद हे पथिक मामग्रे समुद्धृत्य जीवय अनन्तरं निर्भर्त्सयेति॥ यथा

मौढ्येण विपदाग्रस्तं मध्यस्थं सुहृदं तथा।
शक्त्या ततः समुद्धृत्य हितार्थं भर्त्सयेत् सुधीः॥

---

१७ कुक्कुर-क्षुद्रशृगाल प्रस्तावे दृष्टान्तः।

एकदैकः कुक्कुरः कुत्रचित् स्थले पतितं व्याघ्रचर्म्म ददर्श। ततः समीपे गत्वा दन्तैस्तच्छेत्तुमुपचक्रमे। अनन्तरं क्षुद्र-शृगालस्तत् सर्व्वमालोक्य कुक्कुरं जगाद रे पशो यद्ययं व्याघ्रो न ममार तदा भवदीय दन्तेभ्यः नखेभ्यश्चास्यदन्तनखानि भीषणानि मत्वसीति॥ यथा

शतेष्वि दुर्दशां लोके त्तुद्रो प्यहित माचरेत्।
पङ्के निमग्ने करिणि भेको भवति मूर्द्धगः॥

---

## १८ उदराङ्गयोः प्रस्तावे दृष्टान्तः।

उदरस्यापराङ्गस्य च परस्परं विवादो बभूव। तत्र च परस्परं जगाद अहमेव शरीरं वहामि रक्षामि च। तत्राङ्गं पुनरेवेदमवदत् निजशक्त्याहं शरीरं वहामि तत्राप्युदरमेवमवदत् यद्यहं नाश्नामि तदा त्वं गन्तुं किञ्चित् कर्त्तुम्वा न शक्ष्यसीति॥ यथा

सहायेन विना नैव कार्य्यं किमपि सिध्यति।
एकेन चरणेनापि गतिः कस्य प्रवर्त्तते॥

---

## १९ सूर्य्य-पवनयोः प्रस्तावे दृष्टान्तः।

एकदा सूर्य्यपवनयो र्विवादोऽभूत्। तत्र परस्परेणेदमुक्तं। अहो आवयोर्मध्ये कोवा त्यक्त वस्त्रान् मनुष्यान् कर्त्तुं शक्नोति। तदादौ वायुरतिप्रचण्डतरोभूत्वा ववौ मनुष्या स्तद्वेगं सोढुं शरीरे दृढतरं वस्त्रं बद्ध्वा सावधाना बभवुः। यदातु मेघात्यये सूर्य्यस्य खरतरकिरणोत्तापतोऽत्यन्तग्रीष्मागमस्तदा लोकाः शरीरवसनं भारवत् विज्ञाय तत्यजुरिति॥ यथा

उपाये नहि यच्छक्यं नतत् शक्यं पराक्रमैः।
शृगालेन हतोहस्ती गच्छता पङ्कवर्त्मना॥

२० कुक्कुटद्वय प्रस्तावे दृष्टान्तः।

द्वौ कुक्कुटौ एकाङ्गनाभिलाषिणौ भूत्वा युद्धं चक्रतुः। तत्र च द्वयोर्मध्ये एको बलवान् बभूव स्थानान्तरे पलाययामास। परन्तु योहि जेता बभूव सहि उच्चतरप्रासादशिखरे उपित्वा पक्षौ प्रसारयामास। तथा शब्दाययन्नतिशयं जगर्ज इति॥ यथा

अहमेवबली नचापर इति बुद्धिः प्रलयंकरी नृणां।
नहि सन्ति मही तले कति प्रबलाविकटाबलोज्वलाः॥

---

२१ मृगादनव्याघ्राणां प्रस्तावे दृष्टान्तः।

एकदा कियन्तोमृगादनव्याघ्रा गर्तनिपतितं गोचर्म्मविलोक्य भोक्तुकामा बभूवुः। परन्तु तदानीं गर्त्ती जलेन पूर्ण आसीत् चर्म्मच दूरे पयसि पतितमासीत्। ततस्ते सम्भूय मन्त्रयामासुः वयमादौ गर्त्तस्थं तावज्जलं पीत्वा गर्त्तं शोषयामः पश्चात् अजिनमादाय भोक्ष्यामहे। इत्यवधार्य्य उदरं पूरयित्वा ते पानीयं पपुः। अधिकजलपानेन उदरविदारणात् ते सर्व्वे मम्रुः सुतरां तच्चर्म्मभोजनं नासीत्तेषामिति॥ यथा

शक्याशक्यमविज्ञाय यस्त्वऽसाध्ये प्रवर्त्तते।
स केवलमवाप्नोति निजजीवितसंक्षयं॥

---

२२ लुब्धमृगाल-द्वन्दचर प्रस्तावे दृष्टान्तः।

यद्यपि कौतुकापेक्षी शृगालः प्रायेण चतुरतायां निपुणतरस्तथापि एकदा मनस्येवं सुदृढं कृतवान् निजप्रतिवासिना-

नेन द्वन्द्वचरेण सह परिहासं करोमीति। अतस्तमेव द्वन्द्वचरं पक्षिणं मध्याह्ने भोजयितुं समादरेण स निमन्त्रयामास। द्वन्द्वचरस्तदानीं भोजनस्थानमागत्य ददर्श यदेतत् प्रशस्तोन्नतपात्रे विविधव्यञ्जनरसभागमुपन्यस्तमिति। तत्रच पात्रे द्वन्द्वचरः पक्षी निजचञ्चग्रं कष्टेन मज्जयन् यत्नेनापि क्षुधां निवारयितुं न प्राभवत्। शृगालः सत्वरमेव जिह्वयावलिह्य भोक्तुमुपचक्रमे एवं भुंक्ष्व भुंक्ष्वेति निगद्य तं निमन्त्रितं द्वन्द्वचरं मुहुः पप्रच्छ। अहो ममैतत् भक्ष्यद्रव्यं भवते रोचते अहमेवं प्रार्थये यदेतत् द्रव्यं भवतो हृद्यं स्वादुतरं भवेत् किन्तु भवतःशनैः शनैर्भोजनेनाहं क्षुभ्यामि। द्वन्द्वचरस्तदा बुबुधे अहो अनेन परिहासः क्रियते। तस्मान्मया किञ्चिन्न वक्तव्यमिति निश्चित्य तत्र मनोनिवेशं विहाय इदमुवाच। हे जम्बुक भवदीयं सर्व्वं मह्यमधिकं रोचते। ततः स्वस्थान गमनोपक्रमे द्वन्द्वचरः प्रणयित्वमाविष्कुर्व्वन् तञ्जम्बुकं विनयेन निमन्त्रयित्वा प्रतस्थौ। ततः निमन्त्रणवासरे समागते कृताङ्गीकारः शृगालो द्वन्द्वचरस्य भवनं जगाम। ततः समागते शृगाले हृष्टमना द्वन्द्वचरो भोजनीयं प्रगल्भ खण्डशः कृतानि मांसानि दीर्घाकारे क्षीणोन्नतग्रीवघटे स्थापितवान्। जम्बुकस्तद्दृष्ट्वा आत्मनो लाघवेन चिन्तयामास कथं मयात्र भोक्तव्यमिति ततः क्षुद्बाधा पीडितः शृगालो भोजनपराङ्मुखोऽवतस्थे। द्वन्द्वचरस्तु दीर्घग्रीवया तादृक् घटाभ्यन्तरे निजचञ्चुं निवेश्य उदरं पूरयित्वा बुभुजे। अनन्तरं शृगालो घट प्रान्तावयवे पतितं व्यञ्जनरसं वक्रं मत्वा जिह्वया लिलेह।

इत्यवसरे द्वन्द्वचरः शृगालमवलोक्य उपहासं कृत्वा निजगाद हे जम्बुक अहं महासन्तुष्टोऽस्मि यस्मात् तव महती क्षुधाऽस्ति ममैषा वाञ्छा यथाहं तस्मिन्नहनि भवद्गृहेऽखदं तथाद्य त्वमपि प्रसन्नवदनो भूत्वा भुंक्ष्व। एतत् श्रुत्वा शृगालो नम्रमुखो निरानन्दो बभूव। द्वन्द्वचरः कथितवान् माऽत्र रुष्टोभूः। येतु परकृतरहस्यं सोढुमसमर्थास्तेषामनुचितमेव परैरहस्य मिति। यथा

सारल्यं सरले नित्यं विनीतैरपि नम्रतां।
सुहृद्भिरपि सौहृदं शठे शाठ्यं समाचरेत्॥

---

२३ बालक-भेक प्रस्तावे दृष्टान्तः।

एको जलाशय आसीत् यत्र बहवो भेका अवसन् एकदा तत्तीरे शिशवः क्रीडितुमुपातिष्ठन्। तत्रच शर्कराभिः क्रीडाशक्तास्ते जले वारं वारं शर्कराश्चिक्षिपुः। तेन च क्षीणानां भयाकुलानां भेकानां महान् क्लेशोऽजायत। तदनन्तरं तेषां भेकानां मध्ये एकः साहसिको भेको जलाशयान्मुखमुत्तुल्य कथयतिस्म। हा भोः प्रियबालकाः कथं सत्वरा यूयं निजजातीयवैष्ठुर्यं शिक्षध्वे। अहं व्यग्रतया विनयं करोमि यत् युष्माभिर्विवेचनीयमिति। यद्यप्येषा युष्माकं क्रीडा किन्त्वस्माकं मरणमेवेति॥ यथा

परदुःखं समुत्पाद्य यः स्वीयसुखमीहते।
स यदि स्वाऽजस्रंशीलो नरके को गमिष्यति॥

२४ कृषक-गोपाल प्रस्तावे दृष्टान्तः।

नगरप्रान्तभूमौ एको गोपालकः प्रतिदिनं गोचारणं करोति तत्र स एकदैकदा परिहासक्रमेण महाचीत्कारशब्दं कृत्वा कृषकानकथयत् भोः कृषकाः मम गवां मध्ये महान् व्याघ्रः समागतस्तस्मात् यूयं रक्षथ इति। कृषका गोपालकस्य काकुव्याकुलशब्दं श्रुत्वा लगुडमादाय व्याघ्रताडनाय समागच्छन् उपस्थाय च ते दृष्टवन्तः अत्र व्याघ्रो नागतः किन्तु गोपालकोयं प्रतारयति। गोपालकस्यानेन परिहासवचसा विडम्बिताः कृषकाः पराङ्मुखाः स्वस्वस्थानं गतवन्त इति। एकदैक व्याघ्रो हननोद्यतः सन् गवां मध्ये आजगाम गोपालस्तं दृष्ट्वा उच्चैःशब्देन लोकानाजुहाव। कृषका विवेचयामासुः अस्मान् गोपालकः प्रतारयति। अतो रक्षार्थं तन्निकटे कोपि नागच्छत् व्याघ्रो गवां समूहं निहत्य गोपालमवधीत्। प्राणावसानसमये गोपालः सखेद इदमुवाच हा कथं कृषका नवश्यं यदा वञ्चनाय कृषकानाजुहाव तदा ते समागताः इदानीं शार्दूलो मां निहन्ति तथाप्यागत्य कोपि मां न रक्षतीति। यथा

वितथं हि कदापि नोवदेत् यदि तन्नहि गुप्ततां व्रजेत्।
विदितं तत् गमयेच्च गर्हतां नहि विश्वासकणाच वक्तरि॥

---

२५ वक-कर्दमचर प्रस्तावे दृष्टान्तः।

कस्यचित् जलाशयस्य समीपे एको वकः कर्दमचरपक्षी चावसत् तत्र जलाशये म त्स्यान् कीटांश्च तौ अभक्षतां। दैवात्

एकस्मिन् वर्षे अनावृष्टिवशात् तज्जलाशयस्य सर्वं जलमशुष्यत् परन्तु कर्द्दममात्रमासीत्। जलान्मत्स्यानाहृत्य भोजनशील वकस्य केवल कर्द्दमे गन्तुमशक्तस्य भोजनावरोधेनात्यन्त क्लिष्ट तया प्रायेण सन्निहितमरणमासीत्। कर्द्दमचरस्तु पङ्कतो मत्स्यानाहृत्य भुक्त्वा प्रतिदिनमानन्देन ननर्त्त। वकस्तु धूर्त्ततर उपायान्तरमनवलोक्य कर्द्दमचरं प्रत्यवदत् हे भाग्यवन् भवानहञ्च चिरकालमत्रवसामि एवमावयोरेका जीविका परन्तु परस्परमालापव्यवहारौ न स्तः। सौहृद्यमपि नास्ति अतएवानुचितमिदं। अतो भवता सह बन्धुतामिच्छामि कर्द्दमचरपक्षी वकधूर्त्तस्य धूर्त्ततामविज्ञाय बन्धुतां स्वीचकार। ततस्तयो र्बन्धुताऽभवत्। कतिपयदिनान्ते कर्द्दमचरं प्रति वको निजगाद भो बन्धो अस्य जलाशयस्य जलमशुष्यत्। तेन च मत्स्याहरणाभावे अनाहारेणाहं क्लिष्टोस्मि। अतो यद्यपि दुःसमये मह्यमाहारं ददासि तदाहं भुक्त्वा जीवामि एवं भवदनुचरो भूत्वा तिष्ठामि। तवापि विपदि समुत्थि-तायामहमेवोपकरिष्यामि। इदानीं परोपकारकरणे भवतः क्षमतास्ति अतो भवता कर्त्तव्यमिदं येन परोपकारः स्यात्। यतः परोपकारादधिकतरं पुण्यान्तरं नास्ति विशेषतः कातराणामुपकृति रवश्यमेवकर्त्तव्या। यस्मादरोगिनामौष धेनोपकारो विफलएव। इदानीमाहारविरहेणाहं-क्लिश्यामि। अत आहार प्रदानेन मम क्लेशान् दूरीकुरु दयाशीलः कर्द्दमचरो वकस्यारोपित ऋजुभावेन तद्दोषमन-नुसन्धाय समाश्रितं वुद्ध्वा प्रत्यहं तमाहारेण प्रतिपालयामास।

कतिपय दिनेषु गतेषु महतीभि र्वृष्टिभि र्जलाशयो जलपूर्णो बभूव। वकस्तु जलान्मत्स्यानाहृत्य भोक्तुमुपचक्रमे॥

कर्द्दमचरो जलतिरोहित कर्द्दमवशात् न किञ्चिदपि प्राप। अतएवेदं मनसि चकार वकस्य तु मया महोपकारः कृतः अतस्तेन ममोपकारः कर्त्तव्य एव। परन्तु वकतः प्रत्युपकारो दूरेचास्तां किन्तु वकः सततमेव कर्द्दमचरस्य दोषानुसन्धानपरोऽभूत्। केनापि च तस्यापराधमलब्ध्वा तं प्रत्याह रे कर्द्दमचर तवेदमनर्थं नर्त्तनं ममासह्यं। अतस्तदर्थमेवाहं जलाशय मिमं त्यजामीत्युक्त्वा अन्यत्रोड्डीयमानो जगाम। कर्द्दमचर आहार विरहेण प्राणान् तत्याज इति॥ यथा

शठस्तु समयं प्राप्य नोपकारं हि मन्यते।
वरं तमुपकर्त्तारं दोषदृष्ट्या च दूषयेत्॥

---

२६ कुक्कुर-वृषभ प्रस्तावे दृष्टान्तः॥

एकः कुक्कुरो घासकूटोपरि प्रतिदिनं सुष्वाप। तत्र चैको वृषः क्षुद्बाधावाधितस्तं घासं भोक्तुमाजगाम। कुक्कुरः समागतं वृषभमवलोक्यात्यन्तकठोरध्वनिं कृत्वा कुवचनशतैस्तं दूरीचकार। वृषभः कुक्कुरात् भीतः सन्निदमुक्तवान् रे हिंस्रपशो घासमिमं त्वन्तु न भोक्ष्यसे अन्यानपि भोक्तुं निवारयसि। भद्रमेतत् तवानेन क्रूरस्वभावेन त्वं नाशमेष्यसीत्युक्त्वा वृषभोन्यत्र जगाम। अनन्तरं कुक्कुरस्तृणचय रक्षां कुर्व्वन्ननशनेन ममार॥ यथा

तेते सत्पुरुषाः परार्थघटकाः स्वार्थस्य वाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये तद्घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

---

२७ कृषक-कृष्णसर्पयोः प्रस्तावे दृष्टान्तः ।

एकः कृषकः शिशिरसमये ऽतिप्रभाते समुत्थाय नदीतीरे गच्छन् मृतवत् पतितं कृष्णसर्पं तुषाराहतं पङ्कलिप्तं ददर्श। अनन्तरं दयाशीलः कृषको यत्नेन तं निजगृहं निनाय एवं शीतार्त्तं तमग्निना संताप्य जीवयित्वा दुग्धेन फलेन च प्रतिदिन मनुरक्तः सन् पालयामास । अयासीत् कृषकस्यैकः पुत्र स्तस्य च सर्पेण सह सर्व्वदा एकत्र वासेन दृढतरः प्रेमाभूत् अनेनैव रूपेण कृषकभवने भुजगो बहुकालं गमयामास। एकदा दैवयोगेन कृषकशिशु विषधरं दण्डेन ताडयामास। सर्पस्तु क्रूरस्वभावतया तं बालकं ददंश। अनन्तरं कृषक-पुत्रोममार। ततः कृषकः समागत्य सर्पेण निहतं पुत्रं ददर्श। सतु बहुतरेण सर्पं भर्त्सयित्वा कथितवान्। रे पापिष्ठ दुर्म्मते त्वामहं मृतकल्पं समानीय जीवयित्वा यत् पालयामास तस्य किमीदृशं फलं। सर्पः कथयतिस्म अहं निजधर्म्मं रक्षितवान् त्वयैवाग्रे तवानिष्टं कृतं यदा च भवता ममोपकारः कृतस्तदेव समुपपन्नमिदं ॥ यथा

सम्बर्द्धितोपि भुजगः पयसा न वश्य-
स्तत्पालकानपि निहन्ति बलेन सिंहः।
दुष्टः परैरुपकृतस्तदनिष्टकारी
विश्वासलेश इह नैव बुधै र्विधेयः॥

---

२८ कांश्यवणिजा सह चौरद्वय प्रस्तावे दृष्टान्तः।

द्वौ चौरौ एकस्य कांश्यवणिजः पण्यवीथिकायां तैजस पात्रं क्रेतुं प्रजग्मतुः। तत्र च तदानीं समागतै रितरैः क्रेतृभिः सार्द्धं व्यवहारवशेन कांश्यवणिक् व्यग्रतर आसीत्। एतस्मिन् समये एकश्चौर स्तैजसीय पानपात्रमेकं चोरयित्वा सहचर चौरहस्ते न्यस्तं चकार। स च सहचरश्चौरस्तदेव पात्रं परि-हितवाससापिधाय संगोपयामास। इतरस्मिन् क्रेतृगणे प्रस्थिते तैजसपानपात्रमेकं नास्तीति कांश्यवणिगपश्यत् तस्मिन्नेव क्षणे कांश्यवणिक् युवां चौराविति कथयित्वा समुप-विष्टौ तौ दधार। अनन्तरं तौ परमेश्वरसपथं विधाय निर्द्दोषौ बभूवतुः येन चौर्य्यं कृतं तेनेदमुक्तं अहो पश्य मन्नि-कटे पानपात्रं नास्ति येन च संगुप्तं तेनापीदमुक्तं मया नापहृत-मिति। स च वणिक् चौरं निश्चेतुमशक्तो हताशः सन्निद-मुवाच। भद्रं भवन्तौ मन्निकटे दोषरहितौ भवतः किन्तु युवयो रेकतरेणावश्यमेव चौर्य्यं कृतं तदस्तु। युवां मत्तो गोपयामासथुः किन्तु परमेश्वरसपथं कृतवन्तौ भवन्तौ तस्मात् सर्व्वज्ञात् सर्व्वान्तर्यामिपरमेश्वरात् संगोपयितुं न शक्ष्यथः सहि सर्व्वं जानाति अतएव समुचितां शास्तिं दास्यतीति॥ यथा

परद्रव्यापहर्त्ता च परदारपरायणः ।
इहामुत्र वा गच्छेत् दुर्गतिं नात्र संशयः ॥

---

२९ व्याध-शृगाल प्रस्तावे दृष्टान्तः ।

एको व्याध एकस्मिन् वने मृगयायां गत्वा महान्तं शूकरं मृगञ्च हतवान्। ततो मृतशूकरमृगयो र्महता भारेण परिश्रान्तस्य गच्छतः पथि तस्य दिनावसानं बभूव। लुब्धको ऽतिलोभेन मृगशूकरौ विहाय गन्तुं नाशक्नत्। अतएव एकस्य वृक्षस्य मूले रात्रौ न्यवसत्। तत्रैकः कालसर्पोऽस्ति स्म हि यत् यत् पक्कफलं निपतति तदेव भुञ्जानः स्थितवान्। तत्र च व्याधमवलोक्य सर्पश्चिन्तयामास हा अयं निशावसाने सर्व्वाणि पक्काम्राणि गृहीत्वा गमिष्यति। अतो ममाहार-विरोधो भविष्यति। अतोऽयं येन गृहीत्वा गन्तुं नार्हति तद्विधेयमिति विचिन्त्य तं ददंश। तद्दंशनेन विषविशीर्णो व्याधः क्रोधेनैकवाणं मुक्त्वा सर्पं निजघान। पश्चात् सोऽपि हालाहलज्वालया प्राणान् विजहौ। तत्र वृक्षसमीपे एकः शृगाल आसीत्। स हि पूर्व्वं समागते व्याधे मनसेदमचिन्तयत् रात्रिसमयः समागतः व्याधोऽयं ध्रुवमेवात्र मांसं पक्त्वा भोक्ष्यते अतो मह्यमपि किञ्चिद्दास्यतीति यदि च कृत्स्नं मांसं भुक्त्वा न किञ्चिद्दास्यति तथापि त्यक्ताऽस्थिनिचयं प्राप्स्यामीति ॥

अथ सर्पदंशनेन व्याधस्य मृत्युं व्याधशरेण सर्पस्य च मृत्युम-वलोक्य शृगालस्तत्क्षणात् दूरात् वृक्षमूलमागत्य विनायासेन

वज्ञतरं मांसं प्राप्य हृष्टतरो भूत्वा चिन्तयामास। अहमनेन नरमांसेन मासमेकं गमयिष्यामि मृगशूकरमांसेन च द्वौ मासौ गमयिष्यामि सर्पेण च दिनमेकं। सम्प्रति स्वल्पतराहारेण रात्रिं गमयित्वा श्वः प्रभृत्येव यथेष्टं भक्षे इति निश्चित्य प्रथमतो धनुर्गुणं चर्म्मनिर्म्मितमश्नामीति मनसि कृत्वा दन्तेन धनुर्गुणं छेत्तुमारब्धवान्। ततश्छिन्नगुणस्य धनुषः कोट्यग्रविद्धकण्ठः शृगालः प्राणान् विजहाविति॥ यथा

कर्त्तव्यः सञ्चयो नित्यं कर्त्तव्यो नातिसञ्चयः।
अतिसञ्चयशीलस्तु धनुषा जम्बुको हतः॥

---

३० मधुमक्षिका-कपोतपक्षिणोः प्रस्तावे दृष्टान्तः।

एका मधुमक्षिका तृषातुरा सती जलपानार्थं काञ्चिन्नदीं गत्वा तज्जले निपपात। ततः सा नद्याः स्रोतसा चलिता कियद्दूरमगच्छत्। अनन्तरं कश्चित् कपोतो विपद्ग्रस्तां तां मधुमक्षिकामवलोक्य तीरस्थतरोः शाखां नामयामास। अतः सा नम्रीभूतां शाखामालम्ब्य मक्षिका अजीवत्। अथ कतिपय दिनान्ते व्याधविसारितजालमध्ये कपोतः पपात। ततः सगुणजालमाकर्षति व्याधे मन्दत्वकः कपोतो विपदि न्यपतदिति मक्षिका ददर्श। अनन्तरं मक्षिका सपदि निज मुखाग्रशूकवेधेन व्याधं पीडयामास ततः कातरतरो व्याधः सगुणं जालं तत्याज। इत्यवसरे कपोतपक्षी जालात् निर्गत्या जीवदिति॥ यथा

शक्तोगकारः कर्त्तव्यो नापकारः कथनञ्चन ।
नोपकारात् परो धर्म्मो नादकाराच्च पातकं ॥

---

२१ शकटवाह-पथिकयोः प्रस्तावे दृष्टान्तः ।

एकः शकटवाहः शकटं गमयामास । अनन्तरं पथि गर्त्त मध्ये एकदा पतित्वा शकटो निरुद्धो बभूव । निरुद्धे शकटे शकटवाहः शकटात् भूमौ निपत्य परदेवताया आराधनतत् परोऽभूत् । हे परमेश्वर मम शकटं गर्त्तादुद्धृत्य देहि एतस्मिन्नन्तरे एकः समागतः पथिकः शकटवाहं प्रति निजगाद । रे मूर्ख किमिदानीं करोसि नह्यात्मनश्चेष्टां विना किमपि सिध्यतीति । अतस्त्वं शकटचक्रे स्कन्धं दत्वा समुद्धर तथा घोटकं कषयाच सन्ताडय । ततः परमेश्वरस्मरणेन शकटोयमुत्तरिष्यतीति ॥ यथा

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवंविलङ्घ्य कुरु पौरुषमात्मशक्त्या ।
यत्ने कृते यदि नसिद्ध्यति कोऽत्र दोषः ॥

## पञ्चम भागः।

### संगृहीत श्लोकाः॥

विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाच न।
स्वदेशे पूज्यते राजा विद्वान् सर्व्वत्र पूज्यते॥
पण्डिते च गुणाः सर्व्वे मूर्खे दोषाश्च केवलं।
तस्मा मूर्खं सहस्रेषु प्राज्ञ एको विशिष्यते॥
मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत्।
आत्मवत् सर्व्वभूतेषु यः पश्यति स पण्डितः॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥
माता शत्रुः पिता वैरी येन बालो न पाठितः।
सभामध्ये न शोभन्ते हंसमध्ये वको यथा॥
वरमेको गुणी पुत्रो न च मूर्खशतैरपि।
एकचन्द्रस्तमो हन्ति न च तारागणैरपि॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा॥
दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चित् न भाषते॥
उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च यस्तिष्ठति सबान्धवः॥

परोक्षे कार्य्यं हन्तारं प्रत्यक्षे प्रियवादिनं ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखं ॥
दुर्ज्जनः प्रियवादी च नैतद्विश्वासकारणं ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलं ॥
दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सः ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥
परदारं परद्रव्यं परीवादं परस्य च ।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्ज्जयेत् ॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥
यस्मिन्देशे न सम्मानो न प्रीति र्न च बान्धवाः ।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत् ॥
दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥
कुलीनैः सह सम्पर्कं पण्डितैः सह मित्रतां ।
ज्ञातिभिश्च समं मेलं कुर्व्वाणो न विनश्यति ॥
यो ध्रुवाणि परित्यज्य अध्रुवं परिसेवते ।
ध्रुवाणि तस्य नश्यन्ति चाध्रुवं नष्टमेव च ॥
पुस्तकस्था च या विद्या परहस्तगतं धनं ।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनं ॥
पादपानां भयं वातः पद्मानां शिशिरो भयं ।
पर्व्वतानां भयं वज्रः साधूनां दुर्ज्जनो भयं ॥
बहुभिर्मूर्खसंघातै रन्योन्य पशुवृत्तिभिः ।

प्रच्छाद्यन्ते गुणाः सर्व्वे मेघैरिव दिवाकरः ॥
कुदेशमासाद्य कुतोऽर्थसञ्चयः
कुपुत्रमासाद्य कुतो जलाञ्जलिः ।
कुगेहिनीं प्राप्य कुतो गृहे सुखं
कुशिष्यमध्यापयतः कुतो यशः ॥
सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥
समस्तनीतिशास्त्रज्ञो वाहने पूजितश्रमः ।
शौर्य्यवीर्य्यगुणोपेतः सेनाध्यक्षोविधीयते ॥
मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः ।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥

इति चाणक्यश्लोकाः ।

---

कोन्वस्मिन् प्रथितोलोके सद्गुणी गुणवत्तरः ।
धर्म्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥
उदाराचारसम्पन्नः सर्व्वभूतहिते रतः ।
वीर्य्यवांश्च वदान्यश्च कश्चापि प्रियदर्शनः ॥
जितक्रोधो महान् कश्च धृतिमान् कोऽनसूयकः ।

संजातरोषात् कस्माच्च देवता अपि बिभ्यति ॥
क उदारः समर्थश्च त्रैलोक्यस्यापि रक्षणे ।
कः प्रजानुग्रहरतः कोनिधि र्गुणसम्पदां ॥
नियतात्मा महात्मा च धृतिमान् द्युतिमान् वशी ।
बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिसूदनः ॥
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।
महेष्वासो महातेजा गूढजत्रु ररिन्दमः ॥
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ॥
विशालाक्षः पीनवक्षा लक्ष्मीवान् शुभलक्षणः ।
धर्म्मज्ञः सत्यसन्धश्च प्रजानाञ्च हिते रतः ॥
रक्षिता सर्व्वलोकस्य धर्म्मस्य परिरक्षिता ।
सत्ववान् सर्व्वसत्वज्ञो नीतिमान् प्रतिभाववान् ॥
सर्व्वलोकप्रियः साधु रदीनात्मा बहुश्रुतः ।
सर्व्वदानुगतः सद्भिः समुद्रइव सिन्धुभिः ॥
ससत्यः ससमः सौम्यः सचैकः प्रियदर्शनः ।
समुद्रइव गाम्भीर्य्ये स्थैर्य्येच हिमवानिव ॥

---

सर्व्वे भवन्तः पश्यन्तु कार्य्यं विषयरक्षणं ।
अरक्षोहि विषयाद्राजा मृतकल्पः प्रदृश्यते ॥
तस्मात् स्वविषये रक्षा कर्त्तव्या भूतिमिच्छता ।
यज्ञैर्नावाप्यते स्वर्गो रक्षणात् प्राप्यते यथा ॥

यथा हि पुरुषः कुर्य्यात् शरीरे यत्नमुत्तमं।
वसनाद्यैरुपायैस्तु तथा राज्ये नराधिपः॥
अनागतविधानञ्च कर्त्तव्यं विषये नृपैः।
आगमश्चापि कर्त्तव्यो यथा दोषो न जायते॥

---

सर्व्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितं॥
यथा फलानां पक्वानां नान्यत्र पतनाद्भयं।
एवं नरस्य जातस्य नान्यत्र मरणाद्भयं॥
यथा गारं दृढस्थूलं जीर्णं भूत्वावसीदति।
तथावसीदन्ति नरा जरा मृत्युवशं गताः॥
अत्येति रजनी यातु सा न प्रतिनिवर्त्तते।
यात्येव यमुनापूर्णा समुद्रमुदकार्णवं॥
अहोरात्राणि गच्छन्ति सर्व्वेषां प्राणिनामिह।
आयूंसि क्षयमित्याशु ग्रीष्मे जलमिवांशवः॥
आत्मानमनुशोचत्वं किमन्यमनुशोचसि।
आयुस्तु हीयते यस्य स्थितस्याथ गतस्य च॥
सहैव मृत्यु र्व्रजति सहमृत्यु र्निषीदति।
गत्वा सदीर्घमध्वानं सहमृत्यु र्निवर्त्तते॥
गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः।
जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत्॥
नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमितेऽपि च।

आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयं ॥
हृष्यत्यात्मसुखं दृष्ट्वा नवं नवमिवागतं ।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंक्षयः ॥
यथा काष्ठञ्च काष्ठञ्च समेयातां महार्णवे ।
समेत्य तु व्यपेयातां कालमासाद्य कञ्चन ॥
एवं भार्य्याश्च पुत्राश्च ज्ञातयश्च वसूनि च ।
समेत्य व्यवधावन्ति ध्रुवो ह्येषां विनाभवः ॥
नात्र कश्चिद्यथा भावं प्राणी समतिवर्त्तते ।
तेन तस्मिन्नसामर्थ्यं प्रेतस्य व्यनुशोचतः ॥
यथा हि सार्थं गच्छन्तं ब्रूयात् कश्चित् पथि स्थितः ।
अहमप्यागमिष्यामि पृष्ठतो भवतामिति ॥
एवं पूर्व्वैर्गतो मार्गः पितृपैतामहैर्ध्रुवः ।
तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ॥
वयसः पतमानस्य स्रोतसो वाऽनिवर्त्तिनः ।
आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः ॥

इति रामायणं ।

---

अक्रोधनः क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषाश्च प्रधाना-
विद्वांस्तथैवा विदुषः प्रधानः ॥
नहीदृशं सम्वननं त्रिषु लोकेषु विद्यते ।

दया मैत्रीच भूतेषु दानञ्च मधुरा च वाक्॥
तस्मात् सान्त्वं सदा वाच्यं नवाच्यं परुषं क्वचित्।
पूज्यांश्च संयजेद्धयान्न याचेत कदाचन॥
एते चान्ये च राजानः शतशोऽथ सहस्रशः।
श्रूयन्ते शतशश्चान्ये संख्याता श्चैव पद्मशः॥
हित्वा सुविपुलान् भोगान्बुद्धिमन्तो महाबलाः।
राजानो निधनं प्राप्तास्तव पुत्रा इव प्रभो॥
येषां दिव्यानि कर्म्माणि विक्रमस्त्याग एवच।
माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्ज्जवं॥
विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः।
सर्व्वर्द्धि गुणसम्पन्ना स्तेचापि निधनं गताः॥
तवपुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना।
लुब्धा दुर्वृत्तभूयिष्ठा न तान् शोचितुमर्हसि॥
श्रुतवानसि मेधावी बुद्धिमान् प्राज्ञसम्मतः।
येषां शास्त्रानुगा बुद्धि र्नते मुह्यन्ति भारत॥
निग्रहानिग्रहौ चापि विदितौ ते नराधिप।
नात्यन्तमेवानुवृत्तिः श्रूयते पुत्ररक्षणे॥
भवितव्यं तथा तच्च नानुशोचितुमर्हसि।
दैवं प्रज्ञा विशेषेण को निवर्त्तितुमर्हति॥
विधातृविहितं मार्गं न कश्चिदति वर्त्तते।
कालमूलमिदं सर्व्वं भावाभावौ सुखासुखे॥
कालः सृजति भूतानि कालः संहरते प्रजाः।
प्रजाः कालो निर्द्दहति कालः समयते पुनः॥

कालोहि कुरुते भावान् सर्व्वान् लोके शुभाशुभान् ।
कालः संक्षिपते सर्व्वाः प्रजा विसृजते पुनः ॥
कालः सुप्तेषु जागर्त्ति कालोहि दुरतिक्रमः ।
कालः सर्व्वेषु भूतेषु चरत्यविघ्नतः समः ॥
अतीतानागताभावा ये च वर्त्तन्ति साम्प्रतं ।
तान् कालनिर्म्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि ॥

---

विरूपो यावदादर्शे नात्मनः पश्यते मुखं ।
मन्यते तावदात्मान मन्येभ्योरूपमुत्तमं ॥
मूर्खोहि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ॥
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥
अन्यान् परिवदन् साधु र्यथाहि परितप्यते ।
तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥
अभिवाद्य यथा वृद्धान् सन्तोगच्छन्ति निर्वृतिं ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥
सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥
नास्ति सत्यसमो धर्म्मो न सत्याद्विद्यते परं ।
नहि तीव्रतरं किञ्चिदनृतादिह विद्यते ॥
राजन् सर्षप मात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यसि ॥

इति भारतीय श्लोकाः ।

मूढ जहीहि धनागमतृष्णां कुरु तनुबुद्धे मनसि वितृष्णां ।
यल्लभसे निजकर्म्मोपात्तं वित्तं तेन विनोदय चित्तं ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यं ।
पुत्रादपि धनभाजां भीतिः सर्व्वत्रैषा विहिता रीतिः ॥
का तव कान्ता कस्ते पुत्रः संसारोऽयमतीवविचित्रः ।
कस्यत्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥
मा कुरु धनजनयौवनगर्व्वं हरति निमेषात् कालः सर्व्वं ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं प्रविशाशु विदित्वा ॥
नलिनीदलगतजललवतरलं तद्वज्जीवनमतिशय चपलं ।
क्षणमपि सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका ॥
यावद्वित्तोपार्ज्जनशक्तस्तावन्निजपरिवारो रक्तः ।
तदनु च जरया जर्ज्जरदेहे वार्त्तां कोपि न पृच्छति गेहे ॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्यहि कोहं ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥
सुरमन्दिरतरुमूलनिवासः शय्याभूतलमजिनं वासः ।
सर्व्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥
बालस्तावत् क्रीडाशक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि कोपि न लग्नः ॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्व्वत्र त्वं वाञ्छस्यचिराद्यदि सत्त्वं ॥
दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥

इति मोहमुद्गर श्लोकाः ।

वीभत्साः प्रतिभान्ति किन्न विषयाः किन्तु स्पृहायुष्मती-
देहस्यापचयो मतो निविशते गाढो गृहेषु ग्रहः।
अस्मोप्राप्स्यमिति स्फुरत्यपि हृदि यावत्तिका वासना-
कानामेयमर्कहेतुगहना दैवी सतां यातना॥
अजानन् दाहार्त्तिं विशति शलभो दीपदहनं-
न मीनोपि ज्ञात्वा हृतवडिशमश्नाति पिशितं।
विजानन्तोऽप्येतान् वयमिह विपज्जाल जटिलान्-
न मुञ्चामः कामानहह गहनो मोहमहिमा॥
जन्मेदं वर्थतां नीतं भवभोगोपलिप्सया।
काच मूल्येन विक्रीतो हन्तचिन्तामणि र्मया॥
अमीषां जन्तूनां तुलित बिसिनी पत्र पयसां-
कृते किं नास्माभिः विगलितविवेकै र्व्यवसितं।
यदीशानामग्रे द्रविणकणमोहान्धतमसां-
कृतं वीतव्रीडै र्निजगुण कथापातकमपि॥
वीभत्सा विषया जुगुप्सिततमः कायोवयोगत्वरं-
प्रायोबन्धुभिरध्वनीवपथिकैर्योगो वियोगावहः।
हातव्योयमसार एष विसरः संसार इत्यादिकं-
सर्व्वस्यैवहि वाचि चेतसि पुनः कस्यापि पुण्यात्मनः॥
यदासौ दुर्व्वारः प्रसरति मदश्चित्तकरिण-
स्तदा तस्योद्दाम प्रसररसरूढै र्व्यवसितैः।
क्वतद्धैर्य्यालानं क्वस निजकुलाचार निगडः-
क्व सा लज्जारज्जुः क्वविनयकठोराङ्कुशमपि॥
शुचां पात्रं धात्री परिणति रमेध्य प्रचयभू-

इयं भूतावासो विमृष कियतीं याति न दशां।
तदस्मिन् धीराणां क्षणमपि न चास्थातुमुचितं-
स्वलोकारः कोयं यदहमहमेवेति रभसः॥
केनाप्यनर्थरुचिना कपटं प्रयुक्त-
मेतत् सुहृत्तनयबन्धुमयं विचित्रं।
कस्यात्र कः कथमिह स्वजनो जनोवा-
स्वप्नेन्द्रजालसदृशः खलु जीवलोकः॥
दधतितावदमी विषयाः सुखं स्पृशति यावदियं हृदि मूढता।
मनसि तत्त्वविदांच विवेचके क्व विषयाः क्व सुखं क्व परिग्रहः॥
अथप्राणविनाशसंशयकरीं प्राप्यापदं दुस्तरां-
प्रत्यासन्नभयो न वेत्ति विभवं स्वं जीवनं कांक्षति।
उत्तीर्णस्तु ततो धनार्थमपरां भूयो विशत्यापदं-
प्राणानाञ्च धनस्य चाधमधियामन्योन्य हेतः पणः॥
अमीषां जन्तूनां कतिपय निमेषस्थितिजुषां-
वियोगे धीराणां क इह परितापस्य विषयः।
क्षणादुत्पाद्यन्ते विलयमपि यान्ति क्षणममी-
न केपि स्थातारःसुरगिरिपयोधिप्रभृतयः॥
वनेपि दोषाः प्रभवन्ति रागिणा गृहेषु पञ्चेन्द्रिय निग्रहस्तपः।
अकुत्सिते कर्म्मणि यः प्रवर्त्तते निवृत्त रागस्य गृहं तपोवनं।
विवेकः किं सोपि स्वरसवनिता यत्र न कृपा-
स किं मार्गो यस्मिन्न भवति परानुग्रहरसः।
स किं धर्म्मो यत्र स्फुरति न परद्रोह विरतिः-

श्रुतं किम्वा तस्मादुपशमपदं यन्न नयति ॥
महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।
पारं दुःखोदधे र्गन्तुं तर यावन्नभिद्यते ॥
भवारण्यं भीमं तनुगृहमिदं छिद्रवहुलं-
वली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं विरति फलकं शीलकवचं-
समाधानं कृत्वा स्थिरतर दृशो जागृतजनाः ॥
सूक्तिं कर्णसुधां यनक्तु सुजनस्तस्मिन्न मोदामहे-
क्रूरां वाचमसूयको विषमुचं तस्मिन्न खिद्यामहे ।
या यस्य प्रकृतिः सतां वितनुतां किं न स्तया चिन्तया-
कुर्म्मस्तत् खलु कर्म्म जन्म निगडच्छेदाय यज्जायते ॥
मन्निन्दया यदि जनः परितोषमेति-
नन्वप्रयत्न सुलभोयमनुग्रहो मे ।
श्रेयोर्थिनोहि पुरुषाः परतुष्टिहेतो-
र्दुःखर्ज्जितान्यपि धनानि परित्यजन्ति ॥
दुःखाङ्गारकतीव्रः संसारोयं महानसो गहनः ।
इह विषयामिषलालसमानसमार्ज्जार मा निपत ॥
आदित्यस्य गतागतैरहरहः संक्षीयते जीवनं-
व्यापारै र्वहुकार्य्यकारणगुरुभिः कालोपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते-
पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ॥
धैर्य्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी-

सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः ।
शय्याभूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजन-
मेते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥

इति शान्तिशतकश्लोकाः ।

---

विपदि धैर्य्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधिविक्रमः ।
यशसि चाभिरुचि र्व्यसनं श्रुतौ प्रकृति सिद्धमिदंहि महात्मनां ॥

निन्दन्तु नीतिनिपुणा यदिवास्तु वन्तु-
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा-
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं-
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं-
सत्सङ्गतिः कथय किं न करोति पुंसां ॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वायन्नावसीदति ॥

वरं गहन दुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥

अकरुणत्वमकारणविग्रहः परधनाय रतिः परयोषिति ।
सुजन बन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनां ॥

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा ॥
केयूरा न विभूषयन्ति पुरुषान् हारा न चन्द्रोज्ज्वला-
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्द्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्य्यते-
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणं ॥

इति भर्तृहरिश्लोकाः।

THE LIBRARY OF CONGRESS

LIBRARY OF CONGRESS
0 006 224 900 6